When the multitude of चकोरी birds, with their eyes tremulous on account of thirst, look (eagerly) towards the east, when the assemblage of night lotuses gives up its silence (i.e. blows open), when the God of love shakes his bow (of course of flowers) and when the (amorous) pride of proud ladies is about to disappear, is it then, fit for a mass of clouds. Creator ! to begin to envelope the moon ?

कमलान्योक्तिः

अयि दलदरविंद स्पदमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जतु भृङ्गाः ।

दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बांधवो गंधवाहः ॥ ५ ॥

अयि दलदरविन्द तव स्पन्दमानं मरन्दं लिहन्तः भृङ्गाः किमपि मञ्जु गुञ्जन्तु । तावकीनं परिमलं दिशि दिशि विवृण्वन् अयं अन्यः बान्धवः गन्धवाहः!

O blooming lotus, let the bees licking your trickling honey, hum anything melodiously. (But) this other i.e. the wind diffusing your fragrance in every direction, is your disinterested friend.

कुटजान्योक्तिः

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ६ ॥

हे कुटज, दैवात्समुपागतवति मधुकरे अवहेलां मा गाः। अयं (मधुकरः) मकरन्दतुन्दिलानां अरविन्दानां महामान्यः (अस्ति) ।

When the bee approaches you, by chance, O Kutaja flower, do not disrespect him. (Because) he is highly honoured by the lotuses corpulent on account of honey.

कोकिलान्योक्तिः

तावत्कोकिल विरसान् यापय दिवसान्वनान्तरे निवसन्
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ७ ॥

(हे) कोकिल यावद् मिलदलिमालः कोऽपि रसालः समुल्लसति तावत् वनान्तरे निवसन् (त्वं) विरसान् दिवसान् यापय ।

Pass away the uninteresting days, O Cuckoo, dwelling in the heart of a forest (without cooing) until the mango tree with rows of bees flocking together, puts forth blossoms.

कमलिन्यन्योक्तिः

कमलिनि मलिनीकरोषि चेतः किमिति बकैरवहेलितानभिज्ञैः ।
परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः ॥८॥

(हे) कमलिनि, अनभिज्ञैः बकैः अवहेलिता इति (त्वं) चेतः किं मलिनीकरोषि । ये परिणतमकरंद मार्मिकाः मिलिन्दाः ते जगति चिरायुषो भवन्तु ।

O lotus-plant! why do you make your mind dejected because you are disrespected by the herons? May the bees, the appreciators of your fully matured honey, live long in this world.

कूपान्योक्तिः

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥ ९ ॥

(हे) कूप, नितरां नीचोऽस्मीति त्वं मा कदापि खेदं कृथाः । यतः (त्वं) अत्यन्तसरसहृदयः परेषां गुणग्रहीता चासि ।

O well, never give yourself up to sorrow with the thought, "I am exceedingly low (नीच)" because you have your bottom (हृदय) full of excessively sweet water (रस) and you accept (ग्रहीता) the rope (गुण) of others (in order to let the water be drawn up.)

भ्रमरान्योक्तिः

येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेने हा मधुकरेण कथम् ॥ १० ॥

येन मधुकरेण अमंदमरंदे दलदरविन्दे दिनान्यनायिषत तेन (एव मधुकरेण) हा ! कुटजे खलु ईहा कथं तेने ।

Alas! How did the bee who passed his days in a full-blown lotus, containing a great deal of honey, cherish indeed a longing for a कुटज flower?

चन्दनान्योक्तिः

अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥११॥

अयि मलयज अयं ते महिमा कस्य गिरां विषयः अस्तु, यत (त्वं) परिमलोद्गारैः गरलम् उद्गिरतः फणिनः पुष्टिं पुष्णासि ।

O sandal, who can describe this your greatness? (lit. of whose speech can this your greatness be the subject?), since you nourish the cobras vomitting out poison, by the outpourings of your fragrance.

पाटीरान्योक्तिः

पाटीर तव पटीयान्कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥१२॥

हे पाटीर इमां तव परिपाटीं उरीकर्तुम् कः पटीयान् यत् पिष्टः अपि त्वं पिंषतामपि नृणां परिमलैः पुष्टिं तनोषि. ।

O sandal, who is clever in imitating this your conduct, that you gratify with your fragrance even those persons who grind you, although you are ground by them.

हंसान्योक्तिः

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः ॥१३॥

(हे) हंस नीरक्षीरविवेके त्वमेव आलस्यं तनुषे चेत् अधुना विश्वस्मिन् कः अन्यः कुलव्रतं पालयिष्यति ।

O swan, if you yourself become lazy in differentiating between water and milk, who else in the world, now, will observe this vow, handed down from generation to generation ?

उपरि करवालधाराकाराः क्रूरा भुजंगमपुंगवात् ।
अन्तः साक्षाद्द्राक्षादीक्षागुरवो जयन्ति केऽपि जनाः ॥१४॥

उपरि करवालधाराकाराः भुजंगमपुंगवात् क्रूराः अन्तः साक्षाद् द्राक्षादीक्षागुरवः केऽपि जनाः जयंति ।

A victory to persons of indescribable greatness whose external form is like the edge of a sword, and who are more frightful than huge snakes, but who are at heart preceptors, evidently initiating grapes in sweetness.

अरविन्दान्योक्तिः

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ।
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥१५॥

हे दलदरविंद ते मरन्दं स्वच्छन्दं विंदंत: मिलिन्दा: गुंजितं विदधतु । अथ जगति आमोदान् हरिदन्तराणि नेतुं समीरणात् अन्य: नैव प्रवीण: ।

O full-blown lotus, let the bees enjoying your honey at their own pleasure make a humming sound. But in the world, none other than wind is well-versed in conveying fragrance to different quarters.

सरोन्योक्तिः

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसन्ततिरसौ संतापमालाकुला ।
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥१६॥

“ निदाघमिहिर ज्वालाशतै: अचिरात् शुष्कतां याते मयि संतापमालाकुला असौ पान्थसंतति: कं प्रति गन्ता ” एवं निरंतराधिपटलै: नित्यं यस्य वपु: क्षीयते अस्य मार्गसरस: जीवनं धन्यम् , धिग् वारिधीनां जनु: ।

Blessed is the existence of this lake on the road, whose body is always growing emaciated on account of great constant mental anguish. “ When I shall be soon dried up by the hundreds of rays of the summer-sun, to whom will this crowd of travellers, oppressed with excessive heat, go ?” Fie upon the life of oceans.

मीनान्योक्तिः

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृंगा रसालकुसुमानि समाश्रयन्ते ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ १७॥

हे सर: त्वयि संकोचमञ्चति पतङ्गा: परित: अम्बरपथं आपेदिरे, भृङ्गा: रसालकुसुमानि समाश्रयन्ते, हन्त दीनदीनो मीन: कतमां नु गतिं अभ्युपैतु ।

O lake when you would be dried up, the birds around might have recourse to the aerial path, the bees might resort to the mango-blossoms, but alas ! to what plight would the miserable fish be reduced?

कमलिन्यन्योक्तिः

मधुप इव मारुतेऽस्मिन्मा सौरभलोभमम्बुजिनि मंस्थाः ।
लोकानामेव मुदे महितोऽप्यात्माऽमुनार्थितां नीतः ॥१८॥

हे अम्बुजिनि मधुपे इव अस्मिन् मारुते सौरभलोभं मा अमंस्थाः, अमुना मारुतेन लोकानामेव मुदे महितः अपि आत्मा अर्थितां नीतः ।

O Lotus, (1) Don't consider that there is greed for fragrance in this wind like that in the bee. (2) Don't be greedy in giving your fragrance to the wind as you do when you give it to the bee; for though highly renowned, he has stooped to mendicancy for the pleasure of the people alone (i.e. his desire is not selfish).

मालत्यन्योक्तिः

गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥१९॥

हे मालति मिलिन्दे मञ्जु गुञ्जति मौनं मा उपयासीः । एनं वदान्यगुरवः सुरतरवः शिरसा सादरं वहन्ति ।

O मालति flower do not keep silence (i.e. do not remain closed) when the bee is melodiously humming, (because) the celestial trees, the foremost among the generous, bear him respectfully on their heads.

चन्दनान्योक्तिः

यैस्त्वं गुणगणवानपि सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥२०॥

हे पटीरज, यैः द्विजिह्वैः गुणगणवानपि त्वं सतां असेव्यतां नीतः तानपि (द्विजिह्वान्) वहसि (एतद्) त्वदीयं औन्नत्यं किं कथयामः ।

O sandal tree, what to talk of the nobility of yours, since you give resort even to those very serpents (traducers–backbiters) by whom, you, though possessed of a host of qualities, are rendered incapable of being resorted to by the good! (i.e. your nobility beggars description).

सहकारान्योक्तिः

गाहितमखिलं विश्वं परितो दृष्टाश्च विटपिनः सर्वे
सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ २१ ॥

हे सहकार मधुपेन अखिलं गहनं गाहितं, परितः सर्वे विटपिनश्च दृष्टाः (किन्तु) भवत्समं जगति न (किञ्चिदपि) प्रपेदे ।

The whole wilderness was investigated, all the trees around were observed, but, O mango tree ! the bee did not come across one like you in the world.

भ्रमरान्योक्तिः

अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥२२॥

हे भ्रमर अपनीतपरिमलान्तरकथे देवतरुकुसुमे पदं न्यस्य पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेत्, धन्योऽसि ।

O bee, how discriminate (indiscriminate) you are, if you desire to go yet to another flower, after having stepped on (enjoyed) the flower of a celestial tree, which has removed the talk of any other fragrance. i. e. whose fragrance is unrivalled.

तटिन्यन्योक्तिः

तटिनि चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः ।
शुष्यन्त्या अपि युक्तं किं खलु रथ्योदकादानम् ॥२३॥

हे तटिनि चिराय विचारय, शुष्यन्त्या अपि विन्ध्यभुवः पवित्रायाः तव रथ्योदकादानं खलु युक्तं किम् ।

O river think for a long time (i. e. well) whether it is indeed proper for you, who are sacred because of your rise in the विन्ध्य mountain, to receive street water, even though you are dried up ?

बर्बुरान्योक्तिः

पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं वृतं च खलु शूकैः ।
उपसर्पेम भवन्तं बर्बुर वद कस्य लोभेन ॥२४॥

हे बर्बुर पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं, शूकैः च खलु वृतं भवन्तं वद कस्य लोभेन उपसर्पेम ।

O बर्बुर tree ! say with what attraction should we approach you, who are never seen possessed of the beauty of leaves, fruits and flowers, but are covered with thorns.

कोकिलान्योक्तिः

एकस्त्वं गहनेऽस्मिन्कोकिल न कलं कदाचिदपि कुर्याः ।
साजात्यशङ्कयाऽमी न त्वां निघ्नन्ति निर्दयाः काकाः ॥२५॥

हे कोकिल, अस्मिन् गहने त्वं एकः कदाचिदपि कलं न कुर्याः (येन) अमी निर्दयाः काकाः साजात्यशङ्कया त्वां न निघ्नन्ति ।

O cuckoo, you, while alone in the forest, should never utter sweet notes so that these merciless crows may not slay you, mistaking you to be one of their own kind.

हिमाचलान्योक्तिः

तरुकुलसुषमापहरां जनयन्तीं जगति जीवजातार्तिम् ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥२६॥

हे भवानीतात तरुकुलसुषमापहरां, जगति जीवजातार्तिं जनयन्तीं, इमां हिमानीं केन गुणेन वहसि ?

O father of पार्वती, for what attraction, do you bear this mass of snow, which in this world, mars the beauty of the collection of trees and which inflicts pain on all living beings ?

कलभान्योक्तिः

कलभ तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुंदराणां द्विपधुर्याणामयं शिरोधार्यः ॥२७॥

हे कलभ तव अन्तिकं आगतं एतं अलिं कदापि मा अवज्ञासीः दानसुंदराणां द्विपधुर्याणां अपि अयं (अलिः) शिरोधार्यः (विद्यते) ।

O young elephant, never disregard the bee that has approached you, (for) he is to be borne on the head, even by the foremost of elephants, adorned with rut.

भ्रमरान्योक्तिः

अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥२८॥

अमरतरु .....कामस्य भ्रमरस्य इयं पुष्पान्तरसेवा महती विडंबना ।

This resorting to another flower of a bee, all of whose wishes are completely fulfilled by the enjoyment of fragrance of flowers of the celestial trees, is a matter of great ridicule.

माकन्दान्योक्तिः

पृष्टाः खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्वे ।
माकन्द न प्रपेदे मधुपेन तवोपमा जगति ॥२९॥

हे माकन्द परपुष्टाः खलु पृष्टाः परितः च सर्वे विटपिनो दृष्टाः (किंतु) मधुपेन तव उपमा जगति न प्रपेदे ।

Indeed cuckoos are inquired of, all the trees around are observed, but nothing equal to you, O mango tree, is met with by the bee.

मालाकारान्योक्तिः

तोयैरल्पैरपि करुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥३०॥

हे मालाकार अस्य तरोः या पुष्टिः भवता अल्पैः अपि तोयैः भीमभानौ निदाघे करुणया व्यरचि, सा वारां धारासारानपि विश्वतः विकिरता प्रावृषेण्येन वारिदेन जनयितुं शक्या किम् ?

Is it possible here for the rainy cloud, which sprinkles down all around, even heavy showers of water, to bring about that nourishment in this tree which is effected by you, O gardener, with tenderness, with even a little water in summer when the sun was scorching ?

तोयदान्योक्तिः

आरामाधिपतिर्विवेकविकलो नूनं रसा निरसा
वात्याभिः परुषीकृता दशदिशश्चण्डातपो दुःसहः ।
एवं धन्वनि चंपकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ॥३१॥

नूनं आरामाधिपतिः विवेकविकलः, रसा नीरसा, दशदिशः वात्याभिः परुषीकृताः, चण्डातपः दुःसहः, एवं धन्वनि चंपकस्य सकले संहारहेतौ अपि, हे तोयद, अमृतेन सिञ्चन् त्वं वेधसा कुतोऽप्याविष्कृतः ।

Indeed, the keeper of the garden is thoughtless, the earth is void of moisture, the ten quarters are rendered dusty by gusts of wind, and the scorching heat is unbearable, thus even though all these are the reasons for the destruction of the चंपक in the barren land, you, O cloud, sprinkling it with water (nectar) are manifested by Brahma, from an unexpected quarter.

हर्यन्योक्तिः

न यत्र स्थेमानं दधुरतिभयभ्रान्तनयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥३२॥

यत्र (द्वारे) अतिभयभ्रान्तनयनाः गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः स्थेमानं न दधुः (तत्र) परलोकं गतवतः हरेः, (पुरा) लुठन्मुक्ताभारे द्वारे, अद्य शिव शिव ! शिवानां कलकलः भवति ।

Alas! today the female jackals are howling near the door of the dead lion, where myriads of pearls are rolling, where formerly elephants whose eyes were tremulous owing to excessive fear and around whose temples dripping with excessive ichor, the bees were hovering, did not dare to stand steadily.

बकुलान्योक्तिः

दधानः प्रेमाणं तरुषु समभावेन विपुलं
न मालाकारोऽस्मावकृत करुणां बालबकुले ।
अयं तु द्रागुद्यत्कुसुमनिकराणां परिमलै-
र्दिगन्तानातेने मधुपकुलझङ्कारभरितान् ॥३३॥

तरुषु समभावेन प्रेमाणं दधानः असौ मालाकारः बालबकुले विपुलां करुणां न अकृत, तु अयं (बालबकुलः) द्रागुद्यत्कुसुमनिकराणां परिमलैः दिगन्तान् मधुपकुलझङ्कारभरितानातेने ।

Loving all the trees impartially, the gardener did not show much (special) compassion towards the young बकुल plant. Still, it filled the ends of quarters with the humming of the clusters of bees with collections of flowers quickly springing from it.

वृक्षपत्यन्योक्तिः

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ।
एकः किन्तु मनागयं जनयति स्वान्ते ममाधिज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥३४॥

हे तरुपते मूलं बन्धनदृढं अतीव स्थूलं, शतं शाखाः मांसलाः, दुर्गमहीधरे वासः तव भीतिः कुत्रास्ति; किन्तु अयं एकः ज्वालालीवलयीभवन् अकरुणः घस्मरः दावानलः मम स्वान्ते मनाग् आधिज्वरं जनयति ।

The big trunk is firmly strengthened by roots, the many (hundred) branches are massive, your situation is on a mountain difficult to ascend, O lord of trees, whence is the danger to you? But only the voracious relentless conflagration forming circles of the collections of flames, produces a little fever in the form of mental agony, in my mind.

मेघान्योक्तिः

ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातक-
स्त्वां ध्यायन् घन वासरान्कथमपि द्राघीयसो नीतवान् ।

दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत्कं प्रति ब्रूमहे ॥३५॥

हे घन ग्रीष्मे भीष्मतरैः करैः दिनकृता दग्धः अपि यः चातकः त्वां ध्यायन् द्राघीयसः वासरान् कथमपि नीतवान्। इदानीं दैवात् लोचनगोचरेण भवता तस्मिन् यदि करकानिपातनकृपा स्वीचक्रे तत् कं प्रति ब्रूमहे।

O cloud, the चातक bird, though scorched with terrible rays in the summer, passed with great difficulty the long days, contemplating on you now that you who have fallen in the range of his sight through his good luck, took to kindness (cruelty) of showering hail-stones on him; with whom shall we lodge a complaint ?

जलधरान्योक्तिः

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम्।
अयि जलधर शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥३६॥

दव...हतानां परिगलितलतानां भूरुहाणां म्लायतां सतां, अयि जलधर शैलश्रेणिशृङ्गेषु बहु तोयं वितरसि, कोऽयं तावकीन श्रीमदः ?

What sort of pride, in abundance of water, is this of yours, that you pour, O cloud, a great deal of water, on the summits of the series of mountains although the trees that are struck by the net-work of flames gathering together from the forest-conflagration, —trees, whose encircling creepers are dropped down and which consequently fade away ?

पान्थान्योक्तिः

श्रृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः।
विश्वार्तिवारणसमर्पितजीवनोऽयं
नाकर्णितः किमु सखे भवतांबुवाहः ॥३७॥

रे पान्थ पुरः अस्य परुषगर्जितं श्रण्वन् हन्त मनाक् अपि विह्वलमनाः न स्याः। सखे विश्वार्तिवारणसमर्पितजीवनः अयं अबुंवाहः भवता न आकर्णितः किमु ?

O traveller, hearing the harsh thundering of the cloud before you, alas! do not be in the least melancholy. O friend, has not this cloud, who devoted all his water (life) in allaying the distresses of the world, been heard of by you?

चन्दनान्योक्तिः

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं तु लोकोत्तरं
कीर्तिः किं च दिगङ्गनाङ्गणगता किन्त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुंदरा-
नुज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥३८॥

सौरभ्यं भुवनत्रयेऽपि विदितं, तु शैत्यं लोकोत्तरं, किं च कीर्तिः दिगंगनांगणगता, किन्त्वेतत् एकं शृणु, हे श्रीखण्ड, कोटरेषु खलु गरलज्वालां उज्झन्ती इयं द्विजिह्वावली, सर्वान् एव ते सुन्दरान् गुणान् निगिरति ।

O sandal tree, your fragrance is known even to the three worlds, extra-ordinary is your cooling power and your fame has reached the courtyard of women in the form of directions, but listen to this one thing. This row of serpents, giving out indeed flames of venom in your hollows, swallows up all your merits.

मेघान्योक्तिः

नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च संगतिः ।
तथापि हरते तापं लोकानामुन्नतो घनः ॥३९॥

There is no expectation (in return), no (consciousness of) courtesy, no love (for people) nor acquaintance, yet the high—soaring cloud (the magnanimous person) removes the heat (worries) of the people.

अंबुजान्योक्तिः

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसति-
र्निवासः पद्मायाः सुरहृदयहारी परिमलः ।

गुणैरेतैरन्यैरपि च ललितस्यांबुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥४०॥

हे अम्बुज (तव) स्वच्छे सरसि समुत्पत्तिः, हरिहस्ते निवसतिः, (त्वं) पद्मायाः निवासः, (तव) परिमलः सुरहृदयहारी, एतैरन्यैरपि च गुणैः ललितस्य द्विजोत्तंसे हंसे यदि रतिः स्यात् (तर्हि) इयं तव अतीवोन्नतिः ।

O lotus, you are born in a pure pond, your abode is the hand of Hari, you are the residence of Laxmi, your fragrance captivates the hearts (even) of Gods, if you—who are adorned by these and other qualities–love a swan–the best of birds—it is the zenith of your greatness.

क्षीरार्णवान्योक्तिः

साकं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमाः
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतेः
किं निन्दान्यथवा स्तवानि कथय क्षीरार्णव त्वामहम् ॥४१॥

ग्रावगणैः साकं अर्कबिम्बोपमाः मणयः तीरे लुठन्ति, नीरचरैः समं प्रौढिं अपि च वीक्ष्य, हे क्षीरार्णव, त्वां अहं किं निन्दानि अथवा स्तवानि ।

On the banks, the jewels resembling the orb of the moon are rolling with the multitudes of stones; in the water is resting the भगवान् नारायण, with the aquatic animals; thus seeing, O milk—ocean, your thoughtlessness, and the zenith of your greatness, should I praise or censure you?

अर्णवान्योक्तिः

किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥४२॥

हे अर्णव एतैः रत्नैः खलु किम्, पुनः ते अभ्रायितेन वपुषा किम्, यत् तावकं सलिलं अपि तृषितानां वदनं न प्रयाति ।

O sea, indeed, what is the use of these jewels? What is the use of your body like the sky, in as much as your water does not reach the mouth of the thirsty (i. e. they cannot drink your water?)

कासारान्योक्तिः

इयत्यां संपत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कासार सहसा ।
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥४३॥

O lake, if you do not at once quench the thirst of the thirsty (lit. distressed) even though now you have so much wealth of water, alas! whose thirst indeed will you remove, being dried up, when in summer the hot-rayed one (the sun) will diffuse around (his rays as hot as) burning charcoal?

समुद्रान्योक्तिः

अयि रोषमुरीकरोषि नो चेत्
किमपि त्वां प्रति वारिधे वदामः ।
जलदेन तवार्थिना विमुक्तान्यपि
तोयानि महान् न हा जहासि ॥४४॥

अयि वारिधे (त्वं) रोषं नो उरीकरोषि चेत् त्वां प्रति किमपि वदामः हा महान् (त्वं) तव अर्थिना जलदेन विमुक्तानि अपि तोयानि न जहासि.

O sea, we shall speak to you something if you do not get angry. Alas! you though great do not give up even those waters that have been showered by the cloud, who is your suppliant.

वर्षानद्यन्योक्तिः

न वारयामो भवतीं विशन्तीं वर्षानदि स्रोतसि जह्नुजायाः ।
न युक्तमेतत्तु पुरो यदस्यास्तरङ्गभङ्गान् प्रकटीकरोषि ॥४५॥

हे वर्षानदि जह्नुजायाः स्रोतसि विशंतीं भवतीं न वारयामः एतत्तु तव न युक्तं यदस्याः पुरः तरङ्गभङ्गान् प्रकटीकरोषि ।

O river in the rainy season, we do not prevent you from confluenting into the stream of the Ganges, but it is not proper for you that you manifest your breaking of waves, before her.

कमलान्योक्तिः

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्रातसमुज्झितानि कुसुमान्याजघ्रिरे निर्जरैः ।
तस्मिन्नद्य मधुव्रते विधिवशान्माध्वीकमाकाङ्क्षति
त्वं चेदश्नसि लोभमम्बुज तदा किं त्वां प्रति ब्रूमहे ॥४६॥

पौलोमी...रुहां कुसुमानि येनाघ्रातसमुज्झितानि (पश्चात्) निर्जरैः आजघ्रिरे, तस्मिन् मधुव्रते अद्य विधिवशात् माध्वीकं आकाङ्क्षति (सति) (हे) अम्बुज, त्वं लोभं अश्नसि चेत् तदा त्वां प्रति किं ब्रूमहे ।

What shall we say to you, o,lotus, if you become greedy, when that bee, who first smelt the flowers of the celestial trees in the garden of Indra and which were then smelt by Gods, is through ill-luck, expecting honey from you ?

राजहंसान्योक्तिः

भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥४७॥

हे राजहंस यत्र भवता मृणालपटली भुक्ता, अम्बूनि निपीतानि, नलिनानि निषेवितानि, वद तस्य सरोवरस्य कृतोपकारः केन कृत्येन भवितासि ।

O king of swans, with what act will you return the obligations of that lake to you, where the clusters of lotus fibres have been enjoyed by you, waters were also drunk to your heart's content and lotuses have been tasted ?

चंचरीकान्योक्तिः

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामश्नति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥४८॥

हे चञ्चरीक कुसुमाकरस्य प्रारम्भे यस्य परित: उल्लसन्मञ्जरीपुञ्जे मञ्जुलगुञ्जितानि रचयन् तान् उत्सवान् आतनो:, तस्मिन् रसालशाखिनि अद्य दैवात् कृशां दशां अञ्चति सति, त्वं विनयं मुञ्चसि चेत् त्वदन्य: को नीच: ?

O bee, who is meaner than you, if you do not be modest towards that mango-tree, which is at present-through ill-luck-shorn of leaves &c, and on whose collection of blooming sprouts, you enjoyed festivals by your sweet songs, at the advent of the vernal season ?

कृष्णसारान्योक्तिः

एणीगणेषु गुरुगर्वनिमीलिताक्षः
किं कृष्णसार खलु खेलसि कानने॒ऽस्मिन् ।
सीमामिमां कलय भिन्नकरीन्द्रकुम्भ
मुक्तामयीं हरिविहारवसुंधरायाः ॥४९॥

हे कृष्णसार, गुरुगर्वनिमीलिताक्ष: अस्मिन्कानने एणीगणेषु किं खलु खेलसि ! इमां भिन्नकरीन्द्रकुम्भमुक्तामयीं हरिविहारवसुंधराया: सीमां कलय ।

O black antelope, why do you enjoy in this forest in the herds of female antelopes, closing your eyes through great pride ? Know this to be the boundary of the play-ground of the lion, filled with pearls (dropping down) from the temples of the elephants, that have been found open.

हर्यन्योक्तिः

जठरज्वलनज्वलताऽप्यपगतशङ्कं समागतापि पुरः
करिणामरिणा हरिणा हरिणाली हन्यतां नु कथम् ॥५०॥

करिणां अरिणा हरिणा जठरज्वलनज्वलता अपि पुरा समागता अपि हरिणाली अपगतशङ्कं कथं हन्यताम् ।

How should a herd of deer, although come in front, be unscrupulously killed by a lion, who is the enemy of elephants, even though he is scorching by the gastric fire (excessive hunger).

हर्यन्योक्तिः

येन भिन्नकरिकुंभविस्खल-
न्मौक्तिकावलिभिरञ्चिता मही ।

अद्य तेन हरिणान्तिके कथं
कथ्यतां नु हरिणा पराक्रमः ॥५१॥

येन (हरिणा) भिन्नकरिकुम्भविस्खलन्मौक्तिकावलिभिः मही अञ्चिता तेन हरिणा अद्य हरिणांतिके पराक्रमः कथं कथ्यताम् ।

How should that lion, who covered the earth with the rows of pearls dropping from the temples of elephants torn open, to-day speak about his valour to the deer ?

गजान्योक्तिः

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥५२॥

हे सखे मदान्धेक्षण गजश्रेणीनाथ, इह जटिलायां वनभुवि त्वं क्षणमपि स्थितिं न दध्याः, कुम्भिभ्रान्त्या खरनखरविद्रावितमहागुरुग्रावग्रामः असौ हरपतिः गिरिगर्भे स्वपिति !

O lord of herds of elephants, whose eyes have been blinded by rut, do not tarry even a moment here in this dense forest. Here in the interior of the mountain is sleeping the best of lions, who has torn asunder with his pointed nails very big mountains (masses of rocks) mistaking them (rocks) for elephants.

गजराजपोतान्योक्तिः

गिरिगह्वरेषु गुरुगर्वगुम्फितो
गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनन्धयो
भविता करेणुपरिशेषिता मही ॥५३॥

हे गजराजपोत गुरुगर्वगुम्फितः (त्वं) गिरिगह्वरेषु न कदापि संचरेः । यदि स्तनंधयः हरिशिशुः बुध्यते, मही करेणुपरिशेषिता भविता ।

O cub of the lord of elephants, being elated with great haughtiness you should never stir in the caves of the mountain.

If the cub of the lion sucking his mother's breast were to be roused, only the female elephants will be left on the earth.

मालाकारान्योक्तिः

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्रापि निदधे ।
इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥५४॥

तरुकुलसमारोपसुकृती निसर्गात् कृती मालाकार: बकुलमपि आरामे कुत्रापि निदधे । इदं को जानीते यदयमिह कोणान्तरगत: जगज्जालं कुसुमभरसौरभ्यभरितं कर्ता ।

A gardener well-versed by nature, ingenious in planting the multitude of trees, planted in his garden even the बकुल tree somewhere. Who knows this that it (though) planted in some corner here will fill the whole world with the fragrance of (its) number of flowers ?

राघवान्योक्तिः

यस्मिन्वेल्लति सर्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिंगिलाङ्गकवलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः ॥५५॥

यस्मिन् राघवे (तन्नामके मत्स्ये) वेल्लति (सति) सर्वत: परिचलत्कल्लोल-कोलाहलै: हरिद्दन्तावला: हृदि मन्थाद्रिभ्रमणभ्रमं (आ) पेदिरे, स: अयं तुङ्गति-मिंगिलाङ्गकवलीकारक्रियाकोविद: केलिकलहत्यक्तार्णव: राघव: कस्य क्रोडे क्रीडतु ।

In whose side (lit. cavity) may this राघव fish play, (the fish) who is an expert in swallowing the bodies of the lofty तिमिंगिल fish and who quitted the sea due to the quarrel in sport, at whose movements the elephants at the quarters experience the apprehension (once experienced) at the time of the revolving of the churning mountain, because of the loud uproar of the huge waves moving all around ?

लवङ्गलतिकान्योक्तिः

लूनं मत्तगजैः कियत्कियदपि च्छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम्
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशो
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥५६॥

कियदपि (काननं) मत्तगजैः लूनं, कियदपि तुषारार्दितैः छिन्नम् शिष्टं (काननं) ग्रीष्मजभीष्मभानुकिरणैः भस्मीकृतं, हा कष्टं एषा कोणगता, मुहुः परिमलै दिशः आमोदयन्ती, ललिता लवङ्गलतिका दावाग्निना दह्यते. ।

Some part of the forest is (cut) destroyed by intoxicated elephants, some part is chopped by persons oppressed by frost and the rest is reduced to ashes by the terrible rays of the summer–sun Alas ! this charming clove plant (creeper) frequently rendering the directions fragrant now lying in the corner, is being burnt by the forest conflagration.

नन्दनान्योक्तिः

स्वर्लोकस्य शिखामणिः सुरतरुग्रामस्य धामाद्भुतं
पोलोमीपुरुहूतयोः परिणतिः पुण्यावलीनामसि ।
सत्यं नन्दन किं त्विदं सहृदयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खाण्डवरङ्गताण्डवनटो दूरेऽस्तु वैश्वानरः ॥५७॥

हे नन्दन, (त्वं) स्वर्लोकस्य शिखामणिः, सुरतरुग्रामस्य अद्भुतं धाम, पौलोमीपुरुहूतयोः पुण्यावलीनां परिणतिरसि (इति) सत्यम् । किन्तु सहृदयैः विधिः नित्यं इदं प्रार्थ्यते । " त्वत्तः खाण्डवरङ्गतांडवनटः वैश्वानरः दूरेऽस्तु । "

Oh Nandan garden, it is a fact that you are the crest–jewel of the heavenly world, a wonderful abode of the collection of celestial trees and the fulfilment of the series of virtuous acts of Indra and Indrani. But the Creator is being always prayed to by the merciful, thus, " Let fire, the actor, dancing, on the stage in the form of the खाण्डव forest, be away from you.

कीरान्योक्तिः

स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने

चञ्चूकोटिविपाटितारपुटो यास्याम्यहं पञ्जरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यन्तः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥५८॥

'स्वस्वव्यापृतिमग्नमानसतया मत्तो जने निवृत्ते चञ्चूकोटिविपाटितारपुटः अहं पञ्जराद् यास्यामि' एवं कीरवरे मनोरथमयं पीयूषं आस्वादयति अंतः वारणकराकारः फणिग्रामणीः संप्रविवेश ।

"When (all) men turn away from me being engrossed in their respective occupation, I shall go away (i.e. fly off) from the cage, breaking open the pane of the door (of the cage) with the points of my beak", while thus a parrot was tasting the nectar, in the form of this desire there crept in, the best of serpents, having the shape of the trunk of an elephant.

मृगान्योक्तिः

रे चाञ्चल्यजुषो मृगाः श्रितनगाः कल्लोलमालाकुला-
मेतामम्बुधिकामिनीं व्यवसिताः सङ्गाहितुं वा कथम् ।
अत्रैवोच्छलदम्बुनिर्भरमहावर्तैः समावर्तितो
यद्ग्रावेव रसातलं पुनरसौ यातो गजग्रामणीः ॥५९॥

रे चाञ्चल्यजुषः श्रितनगाः मृगाः कल्लोलमालाकुलां एतां अम्बुधिकामिनीं (*v.l.* गामिनीं) सङ्गाहितुं कथं व्यवसिताः । यद् अत्रैव उच्छलदम्बुनिर्भरमहावर्तैः समावर्तितः असौ गजग्रामणीः पुनः ग्रावा इव रसातलं यातः ।

O deer, inhabiting the mountains and taking pleasure in fickleness, how have you prepared (resolved) yourself to bathe in this river which is agitated (boisterous) on account of its surging waves? since in this same (river) even that lord of elephants, has (been drowned) gone to the bottom like a stone, being once tossed by the great whirlpools of the surging mass of waters.

पोतान्योक्तिः

पिब स्तन्यं पोत त्वमिह मददन्तावलधिया
दृगन्तानाधत्से किमिति हरिदन्तेषु परुषान् ।

त्रयाणां लोकानामपि हृदयतापं परिहर-
न्नयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥६०॥

(हे) पोत स्तन्यं पिब, इह त्वं मददन्तावलधिया हरिदन्तेषु परुषान् दृगन्तान् किमिति आधत्से ! त्रयाणां लोकानां अपि हृदयतापं परिहरन् अयं नवनीलो जलधरः धीरं धीरं ध्वनति ।

O cub, suck milk, why do you here cast angry side glances at the ends of quarters thinking that (there are) rutting elephants(there)? This is the new and dark cloud that is sonorously thundering, (the cloud) which removes mental anguish of all three worlds even.

मेघान्योक्तिः

धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः ।
उन्मदवारणबुध्या मध्येजठरं समुच्छलति ॥६१॥

(हे) नीरद, अलं: ते धीरध्वनिभिः मे मासिको गर्भः उन्मदवारणबुध्दया मध्येजठरं समुच्छलति ।

O cloud, enough of your sonorous rumblings (because) my foetus, one month old, moves about in my abdomen, considering you to be an intoxicated elephant,

सिंहान्योक्तिः

वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥६२॥

वेतण्डगण्डकण्डूतिपांडित्यपरिपंथिना हरिणा हरिणालीषु कः पराक्रमः कथ्यताम्।

What exploit may be related to the multitudes of the deer by the lion, who is the obstacle in the skill in the rubbing of the temples by the elephants ?

अम्भोरुहान्योक्तिः

नीरान्निर्मलतो जनिर्मधुरता वामामुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत्प्रीतिमुरीकरोषि मधुपे तत्त्वां किमाचक्ष्महे ॥६३॥

हे अम्भोरुह यस्य तव जनिः निर्मलतः नीरात्, यस्य (तव) मधुरता वामामुखस्पर्धिनी, यस्य तव हरेः करे वासः, परिमलः (च) गीर्वाणचेतोहरः, (त्वं) अहो महाकविगिरां कामस्य च तत् सर्वस्वं, त्वं मधुपे प्रीतिमुरीकरोषि चेत् त्वां किमाचक्ष्महे।

O lotus, you are born of clear water, your sweetness vies with the face of a beautiful lady, your habitation is the hand of Hari, your fragrance captivates the minds of Gods, you are the whole and sole possession of the words of the great poets and of cupid, yet if you entertain love for a bee, what shall we talk to you?

करिनायकान्योक्तिः

लीलामुकुलितनयनं किं सुखशयनं समातनुषे।
परिणामविषमहरिणा करिनायक वर्धते वैरम् ॥६४॥

हे करिनायक लीलामुकुलित नयनं सुखशयनं किं समातनुषे, परिणामविषमहरिणा (सह तव) वैरं वर्धते।

O lord of elephants why do you enjoy sleeping at ease with your eyes half-closed in the amorous sport? your enmity, with the lion the result of which will be grave, is waxing (thereby).

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥६५॥

विदुषां वदनाद् वाचः सहसा वहिः नो यान्ति। याताः चेत् द्विरदानां रदाइव न पराञ्चन्ति।

Words do not come out of the mouth of the wise thoughtlessly; but if once they come out they are never withdrawn like the tusks of elephants.

कल्पद्रुमान्योक्तिः

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥६६॥

औदार्यं भुवनत्रयेऽपि विदितं, संभूतिरंभोनिधेर्वासो नंदनकानने, परिमलो गीर्वाणचेतोहरः एवं दातृगुरोः सुरतरोः सर्वेऽपि गुणाः लोकोत्तराः (अभविष्यन्) यदि (तस्मिन्) अर्थिप्रवरार्थीतार्पणविधौ एकः विवेकः स्यात् ।

"The generosity is well known even in the three worlds; (its) birth is from the reservoir of water (sea); (its) residence is in the नन्दन garden, (its) fragrance captivates the minds of Gods," thus even all the merits of the celestial tree–the best of donors, would have been extraordinary had there been one (merit of) discretion (on his part) in the act of granting the requests of the best of supplicants.

व्याधान्योक्तिः

एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिन्त्य मास्म मनसि व्याधानुतापं कृथाः ।
भूपानां भवनेषु किं च विमलक्षेत्रेपु गूढाशयाः
साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षाः नराः ॥६७॥

एकः अहं अपघृणः विश्वसतां प्राणिनां प्राणान् हरामि इति एवं परिचिन्त्य हे व्याध, मनसि मास्म अनुतापं (अ) कृथाः । (यतः) भूपानां भवनेषु किं च विमलक्षेत्रेपु साधूनां अरयः गूढाशयाः । त्वतुल्यकक्षाः खलाः कति न वसन्ति ।

O fowler, do not feel remorse at heart after thinking thus, "I alone being relentless, destroy the life of animals confiding (in me,)" (for) there dwell in the palaces of kings and holy places thousands of wicked persons with their motives concealed, that are the enemies of the good and have a state similar to that of yours.

विश्वास्य मधुरवचनैः साधून्ये वञ्चयन्ति नम्रतमाः ।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ॥६८॥

ये नम्रतमाः साधून् मधुरवचनैः विश्वास्य (तान्) वंचयन्ति तानपि (हे) मातः काश्यपि, दधासि । (हन्त) तवापि च विवेकः यातः ।

. O mother earth, you bear even those who, (pretending to be) the humblest, deceive the good by inspiring them with confidence by palatable words; even you have lost discretion.

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्यहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥६९॥

अन्या जगद्धितमयी मनसः प्रवृत्तिः, वचनावलीनां रचना काऽपि अन्या एव, लोकोत्तरा च कृतिराकृतिरार्यहृद्या विद्यावतां सकलमेव गिरां दवीयः ।

Unusual is the inclination of (their) mind, beneficial to the world; extra-ordinary is the composition of the multitude of (their) worlds; uncommon is their action; captivating is their form to the noble; (nay) everything belonging to the learned is beyond description.

कालागुर्वन्योक्तिः

आपद्गतः किल महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥७०॥

महाशयचक्रवर्ती किल आपद्गतः अकृतपूर्वं उदारभावं विस्तारयति । दहनमध्यगतः कालागुरुः समन्ताद् लोकोत्तरं परिमलं प्रकटीकरोति ।

Tho best of the magnanimous, indeed, when fallen into adversity, extends the unprecedented generosity; sandal when cast into fire emits (all) around extraordinary fragrance.

काश्मीरजान्योक्तिः

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥७१॥

विश्वाभिरामगुणगौरवगुंफितानां निर्मलधियां रोषोऽपि रमणीयः एव, लोकंपृणैः परिमलैः परिपूरितस्य काश्मीरजस्य कटुताऽपि नितांतरम्या ।

Even the wrath of persons whose minds are pure, and who are filled with abundance of qualities pleasing to the whole world, is pleasing. Even the bitter taste of saffron which is filled with fragrance pleasant to the people, is excessively pleasing.

लीलालुण्ठितशारदापुरमहासंपद्भराणां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत्पामराः ।
अद्य श्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः ॥७२॥

लीलालुंठितशारदाः पुरमहासंपद्भराणां पुरो विद्यासद्मविनिर्गलत्कणमुषः पामराः वल्गन्ति चेत् अद्य श्वः शकुन्तशिशवः फणिनां (मूर्धसु), शशाः दन्तावलानां मूर्धसु, शालावृकाः सिंहानां (मूर्धसु) च सुखेन पदं धास्यन्ति ।

If ignorant persons, stealing particles dropping from the house of knowledge, were to prattle before those who in a mere sport plundered the store of great wealth in the town of learning, to-day or tomorrow, (it may happen that) young birds will subdue the (hooded) serpents, the rabbits will overpower the elephants and the foxes (or dogs) will easily defeat the lions.

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥७३॥

गुरूणां परुषाक्षराभिः गीर्भिः तिरस्कृताः नराः महत्वं यान्ति, अलब्धशाणोत्कषणाः मणयः नृपाणां मौलौ न जातु वसन्ति ।

Persons scolded by the utterances of great persons containing harsh words, attain to greatness. Never do the jewels (ornaments) (ascend) live on the heads of the kings, unless they undergo the scratching on the touch-stone.

वहति विषधरान्पटीरजन्मा
शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कं
पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥७४॥

(यत्) क्षितींद्राः खलु पिशुनजनं बिभ्रति (तत्) पटीरजन्मा विषधरान्वहति दीपः शिरसि मसी (षी) पटलं दधाति, विधुरपि कलंकं भजतेतराम् ।

(Inasmuch as) the kings nourish the wicked, the sandle-tree gives resort to the serpents, the lamp bears the coat of soot, (and) even the moon bears the stain.

सत्पूरुषः खलु हिताचरणैरमन्द-
मानन्दयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारै-
रिन्दुर्विकासयति कैरविणीकुलानि ॥७५॥

खलु सत्पूरुषः अनुक्तः एव हिताचरणैः अखिललोकं अमन्दं आनन्दयति कथय, केन आराधितः इन्दुः उदारैः करैः कैरविणीकुलानि विकासयति ।

A good person indeed, though not requested incessantly, gives pleasure to the whole world by his charitable actions, say, at whose request does the moon cause the clusters of moon-lotuses to bloom by his benevolent rays?

कृतमपि महोपकारं पय इव पीत्वा निरातङ्कः ।
प्रत्युत हन्तुं यतते काकोदरसोदरः खलो जगति ॥७६॥

पय इव कृतमपि महोपकारं पीत्वा प्रत्युत निरातंकः काकोदरसोदरः खलः जगति (उपकारिणं) हन्तुं यतते ।

A wicked man, the brother of a cobra, strives, on the contrary, to kill (his benefactor) without any fear, after swallowing up (i. e. forgetting) the obligation done to him like milk (in the case of the cobra).

पाण्डित्यं परिहृत्य यस्य हि कृते बन्दित्वमालंबितं
दुष्प्रापं मनसाऽपि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रूढस्तत्र स चेन्निगीर्य सकलां पूर्वोपकारावलिं
दुष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे ॥७७॥

यस्य हि कृते पाण्डित्यं परिहृत्य (अस्माभिः) वंदित्वमालम्बितं, यो (अस्माभिः) गुरुतरैः क्लेशैः मनसा अपि दुष्प्रापं पदं प्रापितः स दुष्टः तत्र (तस्मिन् पदे)

रूढः सकलां पूर्वोपकारावलिं निगीर्य प्रत्यवतिष्ठते चेत् तद् अधुना कस्मै किम् आचक्ष्महे ।

If that wicked person, for whom we condescended to become bards, setting aside learning; and who was raised to a position, difficult to be attained even by mind, (by us) with prodigious efforts, being established there goes against (us) after forgetting (intentionally) all the series of previous obligations, then, now what shall we say to anybody ?

खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशंकिभिर्लोकैर्विषेणाशीविषो यथा ॥७८॥

अपायशङ्किभिर्लोकैः कापट्यदोषेण खलः दूरेणैव विसृज्यते, यथा आशीविषः (अपायशङ्किभिर्लोकैः) विषेण (विषदोषेण) दूरेण विसृज्यते ।

A wicked person is left at a distance by persons who apprehend danger, owing to his deceitful nature like a serpent, owing to his venom.

परार्थव्यासङ्गादुपजहदथ स्वार्थपरता-
मभेदैकत्वं यो वहति गुणभूतेषु सततम् ।
स्वभावाद्यस्यान्तः स्फुरति ललितोदात्तमहिमा
समर्थो यो नित्यं स जयतितरां कोऽपि पुरुषः ॥७९॥

परार्थव्यासंगात् स्वार्थपरतां उपजहदपि यः सततं गुणभूतेषु अभेदैकत्वं वहति; यस्य अन्तः ललितोदात्तमहिमा स्वभावात् स्फुरति यः नित्यं समर्थः सः कोऽपि पुरुषः जयतितराम् ।

He, who leaving aside his selfishness through (his) extreme fondness for doing good to others shows (lit. bears) great unity due to identity towards Gunas and beings, in whose mind the pleasing and generous greatness arises (lit. throbs) by his very nature and who is always capable, such a super-human person is always successful.

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥८०॥

वंशभवो गुणवानपि पुरुषः सङ्गविशेषेण पूज्यते । तुम्बीफलविकलो वीणादण्डः महिमानं न हि प्रयाति ।

A man though born in a respectable family and possessed of good qualities, becomes an object of adoration by his special companionship (with the noble). A staff of a lute, though made of a good bamboo, and possessed of strings, does not attain greatness (lit. is not praised) (as long as) it is void of the frui of a gourd (i. e. void of the base made of gourd.)

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥८१॥

(यथा) निखिलरसायनमहितः लशुनः उग्रेण गन्धेन (निन्दितो भवति) तथा अमितगुणोऽपि पदार्थः एकेन दोषेण निन्दितो भवति ।

A thing possessed of innumerable (good) qualities is condemned for (even) a single defect like garlic (लशुन) because of its violent odour, (although) prominent among all the medicines.

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥८२॥

सद्गुणः विपद्गतः मूर्छां गतः मृतः वा नितरां उपकारमेव तनुते अत्र निदर्शनं पारदो रसः ।

A meritorious man though in adversity, in swoon,or in death, confers abundant obligations, only the instance here is of the fluid mercury.

वनान्ते खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुर्भजति भयहर्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥८३॥

या (सीता) वनान्ते खेलन्ती शशकशिशुमालोक्य चकिता (भूत्वा) सपदि भयहर्तुः भर्तुः भुजप्रान्तं भजति, सा इयं सीता अहो दशवदननीता हलरदैः रक्षोभिः परीता, विवशा, कामपि दशां श्रयति ।

That sita, who while sporting in the skirts of the garden being startled at the sight of the young one of a hare immediately resorts to the bosom of her husband, the remover of her fears, alas !

that सीता (now) when kidnapped by रावण, and surrounded by demons, with plough-like teeth, (resorts to) is reduced to an indescribable (pitiable) condition through helplessness.

पुरो गीर्वाणानां निजभुजबलाहोपुरुषिका-
महो कारं कारं पुरभिदि शरं संमुखयतः ।
स्मरस्य स्वर्बालानयनसुममालार्चनपदं
वपुः सद्यो भालानलभसितजालास्पदमभूत् ॥८४॥

अहो ! गीर्वाणानां पुरः निजभुजबलाहोपुरुषिकां कारं कारं पुरभिदि शरं संमुखयतः स्मरस्य स्वर्बालानयनसुममालार्चनपदं वपुः सद्यो भालानलभसित-जालास्पदमभूत् ।

Alas! the body of the God of love, who aimed his arrow towards the destroyer of (three) cities (i.e. God Shiva), after showing frequently the self-conceitedness of the strength of his arms, in front of Gods, (the body of मदन) the receptacle of worship by the garlands of flowers in the form of eyes of celestial damsels, at once became the abode of the heat of ashes of the fire (on his forehead).

The poet here refers to the verse in the कुमारसंभव 3 72 क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति । तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

युक्तं सभायां खलु मर्कटानां
शाखास्तरूणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी
दन्तैर्नखाग्रैश्च विपाटितानि ॥८५॥

मर्कटानां सभायां खलु (इदं) युक्तम् । तरूणां शाखाः मृदुलासनानि (स्युः), चीत्कृतिः सुभाषितं (स्यात्), दन्तैः नखाग्रैः च विपाटितानि आतिथेयी (स्यात्)

This is indeed proper in the assembly of monkeys: Twigs of trees are soft seats; their चीत्कारs are excellent speeches and their hospitality (consists of) scratches (made) by their teeth and points of their nails.

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोत्करः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासञ्चयः ॥८६॥

किं तीर्थं ? हरिपादपद्मभजनं, किं रत्नम् ? अच्छा मतिः, कि शास्त्रं ? श्रवणेन यस्य गलति द्वैतांधकारोत्करः, किं सततोपकाररसिकं मित्रं ? सखे तत्वावबोधः । वद, कः खेददानकुशलः शत्रुः ? दुर्वासनासंचयः ।

What is a holy place (in this worldly existence)? Devotion to the lotus-like feet of Hari. What is a jewel ? The pure intellect. What is a science ? That on hearing which the mass of darkness in the form of dualism vanishes. What is a friend, always fond of obliging ? Knowledge of the truth. What is an enemy clever in giving pain ? The accumulation of evil desires.

निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥८७॥

चिरं जलनिधौ मग्नः मैनाकः इव मार्दवं (i. e. यथा मैनाकः मार्दवं न एति तथा) वेदान्ते (च) निष्णातोऽपि दुर्जन. साधुत्वं न एति ।

Just as the मैनाक mountain does not become soft, though plunged in ocean for a long time, so also a wicked man though well-versed in Vedanta does not attain to goodness.

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥८८॥

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् । अन्ये शाखिनः विराजन्ते, चन्दनद्रुमाः (तु) खण्ड्यन्ते ।

The absence of virtues (qualities) is better; fie upon the multitude of virtues. Other (ordinary) trees thrive, (while) the sandle trees are cut of.

परोपसर्पणानन्तचिन्तानलशिखाशतैः ।
अचुम्बितान्तःकरणाः साधु जीवन्ति पादपाः ॥८९॥

परोपसर्पणानन्तचिंतानलशिखाशतैः अचुम्बितान्तःकरणाः पादपाः साधु जीवन्ति.

Happily do the trees live, whose hearts are not touched by the hundreds of flames arising from fire in the form of endless anxiety which is the result of approaching others (for begging for something).

शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन्द्रागूर्णायुरिव सज्जनो जयति ॥९०॥

शून्येऽपि स्वकीयगुणजालैः गुणवत्तामातन्वानः द्राक् विवराणि मुद्रयन् च ऊर्णायुः इव सज्जनो जयति ।

A good man is successful who transforms a dunce also into a person of qualities, by means of his own stock of qualities by hiding his faults immediately like a spider who builds his web in a place which is empty, by his net of thread, and covers the openings (in the house) immediately.

खलः सज्जनकार्पासरक्षणैकहुताशनः
परदुःखाग्निशमनमारुतः केन वर्ण्यताम् ॥९१॥

सज्जनकार्पासरक्षणैकहुताशनः परदुःखाग्निशमनमारुतः खलः केन वर्ण्यताम् ।

Who can describe the wicked man who is an unique fire in burning the cotton in the form of a good man, and kind wind that aggravates the fire in the form of miseries of others.

परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समीहितं नितराम् ।
ललिताम्बरमिव सज्जनमाखव इव दूषयन्ति खलाः ॥९२॥

परगुह्यगुप्तिनिपुणं गुणमयं अखिलैः नितरां समीहितं ललितांबरमिव सज्जनं खलाः आखवः इव दूषयन्ति ।

Wicked men spoil (the reputation of a) good man who is well-versed in protecting the secrets (गुह्य) of others, is possessed of good merits and is much liked by all, like mice which spoil a fine garment which is skilled in protecting the private parts (गुह्य) of others, which is full of threads and is much desired by all.

यशःसौरभ्यलशुनः शान्तिशैत्यहुताशनः ।
कारुण्यकुसुमाकाशः खलः सज्जनदुःखदः ॥९३॥

A wicked man giving pain to the good is a garlic to fragrance in the form of fame, a fire to the cold in the form of tranquillity, the sky to the flower in the form of compassion.

वृक्षान्योक्तिः

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥९४॥

यः कुसुमपत्रफलावलीनां भरं धत्ते, घर्मव्यथां शीतभवां रुजं च वहति अन्य-सुखस्य च हेतोः देहमर्पयति तस्मै वदान्यगुरवे तरवे नमोऽस्तु ।

A bow to that tree, the foremost among the liberal, which bears the burden of the clusters of flowers, leaves and fruits, puts up with the afflictions of heat and cold and which sacrifices its own body for the bliss of others.

हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥९५॥

यः दुर्जनं वशयितुं मनीषां तनुते (सः) खलु कौतुकेन हालाहलं पिपासति, कालानलं प्रकामं परिचुचुम्बिषति अद्धा च व्यालाधिपं परिरब्धुं यतते ।

He who cherishes a desire to win over a wicked man, wishes indeed to drink deadly poison with curiosity, to kiss closely the fire of final destruction or to embrace actually the lord of serpents.

जलधरान्योक्तिः

दीनानामिह परिहाय शुष्कशस्या-
न्यौदार्यं प्रकटयतो महीधरेषु ।
औन्नत्यं परममवाप्य दुर्मदस्य
ज्ञातोऽयं जलधर तावको विवेकः ॥९६॥

हे जलधर, परमगौन्नत्यमवाप्य इह दीनानां शुष्कशस्यानि परिहाय महीधरेषु औदार्यं प्रकटयतः दुर्मदस्य तावकः अयं विवेकः ज्ञातः।

This indiscrimination of you, O cloud, is known (to me)–you who being elated with pride on account of your exalted position, display your generosity towards the mountains, leaving aside here dried corn of the poor.

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥९७॥

Mountains are great, the earth is greater still than they, the universe is yet greater than the earth and the high-souled persons who are firm even at the world-deluge are the greatest.

व्योमनि बीजाकुरुते चित्रं निर्माति सुन्दरं पवने ।
रचयति रेखाः सलिले यस्तु खले चरति सत्कारम् ॥९८॥

यः तु खले सत्कारं चरति (सः) व्योमनि बीजाकुरुते, पवने सुन्दरं चित्रं निर्माति, सलिले रेखाः रचयति ।

He who treats the wicked with respect, as if sows seeds in the sky, draws a beautiful picture in wind and draws lines in water.

हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लेढि जिघ्रति संक्षिप्य करोत्युन्नतमासनम् ॥९९॥

केनाप्यज्ञेन दत्तं हारं मर्कटः लेढि, जिघ्रति (पश्चात्) संक्षिप्य आसनं उन्नतं करोति ।

An ape, licks and smells a necklace given to him by an ignorant man and (then) raises his seat by placing that necklace below (its haunches).

मलिनेऽपि रागपूर्णां विकसितवदनामनल्पजल्पेऽपि ।
त्वयि चपलेऽपि च सरसां भ्रमर कथं वा सरोजिनीं त्यजसि
॥१००॥

हे भ्रमर मलिनेऽपि त्वयि रागपूर्णां, अनल्पजल्पेऽपि (त्वयि) विकसितवदनां, चपलेऽपि (त्वयि) सरसां सरोजिनीं त्वं कथं वा त्यजसि ।

O bee the lotus creeper maintains its reddish colour although you are blue (dirty), it blooms its lotuses (lit. face) although you are constantly humming (talkative), it is full of honey (full of love) even though you are volatile (and thus faithless), how do you leave it then?

स्वार्थं धनानि धनिकात्प्रतिगृह्णतो य-
दास्यं भजेन्मलिनतां किमिदं विचित्रम्।
गृह्णन्परार्थमपि वारिनिधेः पयोऽपि
मेघोऽयमेति सकलः किल कालिमानम् ॥१०१॥

यद् स्वार्थं (i. e. स्वार्थाय) धनिकात् धनानि प्रतिगृह्णतः (नरस्य) आस्यं मलिनतां भजेत् इदं किम् विचित्रं? अयं मेघः परार्थं अपि वारिनिधेः पयः अपि गृह्णन् सकलः किल कालिमानम् एति।

What wonder is there that the face of a person who takes money from the rich for selfish motives will be blackened? (why) this cloud taking even water (what to talk of wealth!) from the ocean (the store of water) even for others, indeed becomes dark all over.

जनकः सानुविशेषो जातिः काष्ठं भुजङ्गमैः सङ्गः।
स्वगुणैरेव पटीरज यातोऽसि तथापि महिमानम् ॥१०२॥

हे पटीरज, (तव) जनकः सानुविशेषः, जातिः काष्ठं, सङ्गः भुजङ्गमैः, तथापि त्वं स्वगुणैरेव महिमानं यातोऽसि।

O sandal, your father is a particular summit, by caste you are wood, your companionship is with the serpents, yet you have reached greatness only by your intrinsic merits.

कस्मै हन्त फलाय सज्जन गुणग्रामार्जने सज्जसि
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय।
ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥१०३॥

हे सज्जन, हन्त कस्मै फलाय गुणग्रामार्जने सज्जसि? "स्वात्मोपस्करणाय" (इति) चेत्, मम पथ्यं (wholesome) वचः समाकर्णय, ये भावा

शोभाभरैः संभृताः नितरां हृदयं हरन्ति तैरेव अस्य कलेवरपुषः कलेः दैनंदिनं वर्तनम् ।

O good man, alas! With what aim in view are you prepared to accomplish a multitude of merits? If you reply 'for decorating myself' listen to my wholesome advice. This Kali who is getting stronger gains his livelihood from those very things which, being full of great beauty, greatly attract the mind.

धूमायिता दश दिशो दलितारविन्दा
देहं दहन्ति दहना इव गन्धवाहाः ।
त्वामन्तरेण मृदुताम्रदलाम्रमञ्जु-
गुञ्जन्मधुव्रत मधो किल कोकिलस्य ॥१०४॥

O spring, having bees sweetly humming on mango-trees with tender and reddish foliage, without you, ten quarters having lotuses full-blown are turned smoky and winds (hot) like fire scorch the body of the cuckoo.

भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्यनिकरैः करटिभ्रमेण ।
दैवे पराचि करिणामरिणा तथापि
कुत्रापि नापि खलु हा पिशितस्य लेशः ॥१०५॥

करिणामरिणा करटिभ्रमेण करजाग्रजाग्रदुद्दामशौर्यनिकरैः महागिरिशिलाः भिन्नाः तथापि दैवे पराचि (सति) कुत्रापि (करिणां) पिशितस्य लेशः न खलु अपि ।

Although rocks of gigantic mountains are torn asunder by the enemy of elephants (ie. a lion) with a great deal of valour, active and prominent at the ends of nails, mistaking (the rocks) for elephants yet, fate being adverse, nowhere did he obtain even a bit of flesh (of elephants).

गर्जितामाकर्ण्य मनागङ्के मातुर्निशार्धजातोऽपि ।
हरिशिशुरुत्पतितुं द्रागङ्गान्याकुञ्च्य लीयते निभृतम् ॥१०६॥

निशार्धजातोऽपि हरिशिशुः मातुःअङ्के मनाग् गर्जितं आकर्ण्य, द्राग् उत्पतितुं निभृतं अङ्गानि आकुञ्च्य लीयते ।

Having slightly listened to the thundering while on the lap of its mother, the cub of a lion though half a night old, lurks secretly after contracting its limbs, in order to quickly pounce upon (mistaking the thunder for the voice of an elephant).

किमहं वदामि खल दिव्यमते
गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान्
यदहर्निशं न खलु विस्मरसि ॥१०७॥

हे दिव्यमते खल अभितः भवतः गुणपक्षपातं अहं किं वदामि, यत् खलु अहर्निशम् गुणशालिनः निखिलसाधुजनान् न विस्मरसि ।

O wicked person of celestial intellect, how can I (adequately) describe your partiality (enmity) for qualities, since you do not forget (i.e. remember) all the good persons possessing qualities, by day and night?

रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि ।
अथवालं पापात्मन् कृतया कथयापि ते हतया ॥१०८॥

O wicked man, I shall relate your life (behaviour) in detail in front of the learned or O sinner, what is the use of your wretched account, even though related? (So of course I shall abstain from it).

आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥१०९॥

अयं खलसमागमः आनन्दमृगदावाग्निः, शीलशाखिमदद्विपः, ज्ञानदीप–महावायुः (च अस्ति)।

This companionship with the wicked is (like) a forest conflagration to the deer in the form of joy, a rutting elephant to the tree in the form of character and tempestuous wind to the lamp in the form of knowledge.

खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि ।
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम् ॥११०॥

खलाः तु साधुहितप्रत्यूहकर्मणि कुशलाः, फणिनः निरागसाम् प्राणानपहर्तुं निपुणाः ।

The villains are experts in putting impediments in the welfare of the good. The snakes are experts in taking away the lives of innocent persons.

वदने विनिवेशिता भुजङ्गी
पिशुनानां रसनामिषेण धात्रा ।
अनया कथमन्यथावलीढा
न हि जीवन्ति जना मनागमंत्राः ॥१११॥

धात्रा रसनामिषेण पिशुनानां वदने भुजंगी विनिवेशिता अन्यथा अनया अवलीढाः जनाः अमंत्राः मनाग् (अपि) न हि जीवन्ति (इति) कथम् ।

The creator has placed a female serpent in the form of tongue, in the mouths of the wicked, otherwise how is it that persons bit by her do not live even a minute longer without the application of magic charms?

कृतं त्वयोन्नतं कृत्यमर्जितं चामलं यशः
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः ॥११२॥

हे सखे त्वया उन्नतं कृत्यं कृतम् , अमलं यशः च अर्जितम् यावज्जीवं तुभ्यं विपुलाशिषः दास्यामः ।

O friend, (enemy) you have done an exalted (mean) deed and have gained untarnished fame (notoriety). So long as we live, we shall give you plenty of blessings (curses).

अविरतं परकार्यकृतां सतां
मधुरिमातिशयेन वचोऽमृतम् ।
अपि च मानसमम्बुनिधिर्यशो
विमलशारदचन्दिरचन्द्रिका ॥११३॥

The speech of persons incessantly engaged in obliging others, resembles nectar owing to its excessive sweetness, their mind is (magnanimous) like the sea and their fame resembles the moon-light

of the clear autumnal moon. (i.e. gives excessive pleasure). v. l. पार्व्वणचन्द्रिका– moonlight of the full moon, because पर्व means the full moon-day.

एत्य कुसुमाकरो मे सञ्जीवयिता गिरं चिरं मग्नाम् ।
इति चिन्तयतो हृदये पिकस्य समधायि शौभिकेन शरः ।।११४।।

' कुसुमाकर एत्य मे चिरं मग्नां गिरं सञ्जीवयिता '' इति चिंतयतः पिकस्य हृदये शौभिकेन शरः समधायि ।

"The spring having arrived, will restore my voice that has been silent for a long time," while a cuckoo was thus thinking, an arrow was discharged at its heart by a fowler.

निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ।।११५।।

A man devoid of good merits does not appear to advantage, though set off by a fine (outward) display as a शाल्मलि tree though adorned with the beauty of flowers for the present moment.

पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ।।११६।।

A lake without mud, an assembly without wicked persons, poetry without harsh words and mind void of the sensual objects look beautiful.

तत्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् ।।११७।।

काव्यानां किमपि तत्वं भुवि विरलो जानाति । मधुव्रतं अन्तरेण मरन्दानां मार्मिकः कः (विद्यते) ।

In this world, scarcely any one knows the extraordinary essence of poetry; who but the bee, is the appreciator of honey (in flowers)?

सरजस्कां पाण्डुवर्णां कण्टकप्रकराङ्किताम् ।
केतकीं सेवसे हन्त कथं रोलम्ब निस्त्रपः ।।११८।।

हे रोलम्ब हन्त ! सरजस्कां पाण्डुवर्णां कंटकप्रकरांकितां केतकीं निस्त्रपः कथं सेवसे ।

O bee! How is it, alas! that you shamelessly enjoy a केतकी which is सरजस्का, पाण्डुवर्णा and कण्टकप्रकराङ्किता ?

यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥११९॥

As a राग without तान, a king without respect and an elephant without rut, so is an ascetic (worthless) without knowledge (of ब्रह्मन्).

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेन विभाव्यते ॥१२०॥

नृणां सन्तः गुणाः स्वतः प्रकाशन्ते न परतः । कस्तूर्याः आमोदः शपथेन न हि विभाव्यते ।

The good merits of men shine by themselves and not from (the mouths of) others. The fragrance of musk is, indeed, not known on oath.

कस्तूर्यन्योक्तिः

अयि बत गुरु गर्वं मास्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥१२१॥

अयि कस्तूरि, (musk) अखिलपरिमलानां मौलिना सौरभेण गर्वं मास्म बत यासीः अमुनैव सौरभेण गिरिगहनगुहायां लीनम् अत्यंतदीनं स्वजनकं प्राणहीनं करोषि ।

O musk, alas! do not pride yourself upon your fragrance which is the best of all. Owing to that (fragrance) alone you bring death to your father who is very innocent and who hides himself in the dens in the mountain-forests.

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति ।

भूतेषु किं च करुणां बहुलीकरोति
सङ्गः सतां किमु न मंगलमातनोति ॥१२२॥

सतां संगः कुमतिं दूरीकरोति, चेतः विमलीकरोति, चिरंतनं अघं चुलुकी-करोति, किं च भूतेषु करुणां बहुलीकरोति, किमु मंगलं न आतनोति ।

The company of the good removes ill-thoughts, purifies the mind, destroys the sin of long standing, moreover it widens humanity (the love for creatures), what auspicious thing does it not beget?

अनवरतपरोपकारव्यग्रीभवदमलचेतसां महताम् ।
आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव ॥१२३॥

अनवरतपरोपकारव्यग्रीभवदमलचेतसां महतां आपातकाटवानि वचनानि भेषजानीव स्फुरंति ।

The speech of the great, whose pure mind is always engrossed in the incessant (performance of) philanthropic deeds and which are bitter only at the beginning, shine (i. e. are) like medicines (bringing happiness in the end).

व्यागुञ्जन्मधुकरपुञ्जमञ्जुगीता-
माकर्ण्य स्तुतिमुदयन्नयातिरेकात् ।
आभूमीतलनतकन्धराणि मन्ये-
ऽरण्येऽस्मिन्नवनिरुहां कुटुम्बकानि ॥१२४॥

व्यागुंजन्मधुकरपुंजमंजुगीतां स्तुतिं आकर्ण्य उदयन्नयातिरेकात् अस्मिन्नरण्ये अवनिरुहां कुटुंबकानि आभूमीतलनतकंधराणि इति मन्ये ।

I imagine that the families (clusters) of trees in this forest have bent their necks (branches) down to the surface of the earth because of the excess of modesty (नय) generated in them on hearing their own praise sung by the clusters of beautifully humming bees.

मृतस्य लिप्सा कृपणस्य दित्सा
विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री
विधातृसृष्टौ न हि दृष्टपूर्वा ॥१२५॥

The desire to obtain, to a dead man; the desire to give, in a miserly person; the love for her own husband, in a wanton woman; calmness in a serpent; friendship in a crooked man, have never been witnessed before in the creation of God Brahman (i.e. in the world).

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविण्यो रमन्ते मधुपैः सह ॥१२६॥

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते, राजप्रियाः कैरविण्यः मधुपैः सह रमन्ते ।

There is no faith (i.e we do not confide in) even in the best women; the night lotuses though the favourites of the moon enjoy with मधुपs (bees or drunkards).

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृंखलो नृणाम् ॥१२७॥

नृणां उच्छृङ्खलः विधिः अयाचितः सुखं दत्ते याचितः च (सुखं) न यच्छति सर्वस्वं च अपि हरते ।

The unruly fate of men gives happiness when unasked and does not give it when asked (for it), (not only this but also) it takes away everthing (when it is adverse).

दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ॥१२८॥

दोर्दण्डद्वयकुंडलीकृतलसत्कोदंडचंडाशुगध्वस्तोद्दंडविपक्षमंडलं त्वां मध्येरणं वीक्ष्य वल्गद्गांडिवमुक्तकांडवलयज्वालावलीतांडवभ्रश्यत्खांडवरुष्टपांडवमहो कः क्षितीशः न स्मरेत् ।

Having observed in the battle field you who destroyed the circle of powerful enemies by the terrible darts (discharged) from his brilliant bow bent round by the pair of his (strong) arms, what

king will not remember (i. e. every king will remember) that indignant पाण्डव (namely अर्जुन) who was standing in the खाण्डव wilderness which was destroyed by the movement of the series of flames (issuing) from the circle of arrows discharged from his twanging गाण्डिव bow ?

खण्डितानेत्रकञ्जालिमञ्जुरञ्जनपण्डिताः
मण्डिताखिलदिक्प्रान्ताश्चण्डांशोः पान्तु भानवः ॥१२९॥

चण्डांशोः खण्डितानेत्रकंजालिमंजुरंजनपंडिताः मण्डिताखिलदिक्प्रान्ताश्च भानवः पान्तु ।

May the rays of the sun protect you–the rays which are ingenious in giving sweet charm to the lotuses in the form of the eyes of खण्डिता ladies–the rays which brightened all the nooks and corners of the quarters.

शान्तविलासः

विशालविषयाटवीवलयलग्नदावानल-
प्रसृत्वरशिखावलीविकलितं मदीयं मनः ।
अमन्दमिलदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम् ॥१॥

अमन्द......चंदिरे इदं विशाल......मदीयं मनः चकोरायताम् ।

May my mind, which is distressed by the rows of flames, spreading around, of the forest conflagration which is burning the circle of the extensive forest in the form of the objects of senses (that surround me) act like the चकोर bird towards the moon in the form of the face of मुकुन्द, which is the receptacle of all sweetness and whose splendour is rapidly increasing.

अये जलधिनन्दिनीनयननीरजालम्बन
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरम् ।
प्रभातजलजोन्नमद्गरिमगर्वसर्वङ्कषै-
र्जगत्त्रितयरोचनैः शिशिरयाशु मां लोचनैः ॥२॥

अये जलधिनन्दिनीनयननीरजालंबन (विष्णो) ज्वलज्ज्वलनजित्वरज्वरभरत्वरा-भंगुरं मां प्रभातजलजोन्नमद्गरिमगर्वसर्वंकषैः जगत्त्रितयरोचनैः लोचनैः आशु शिशिरय ।

O (God Vishnu), the support of the lotuses in the form of the eyes of Laxmi, speedily cool me, who am breaking under the force (त्वरा) of the excess of pain that conquers the burning fire, by your glances, liked by the three worlds, and the destroyers of the pride of greatness arising in a morning lotus.

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।

कलिन्दनगनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥३॥

स्मृता अपि (केवलं) करुणया नृणां तरुणातपं हरन्ती, अभङ्गुरतनुत्विषां विद्युतां शतैः वलयिता, कलिन्दनगनन्दिनीतटसुरद्रुमालम्बिनी, का अपि कादम्बिनी मदीयमतिचुम्बिनी भवतु ।

Let the indescribable row of clouds (श्रीकृष्ण) be the object of my contemplation, which, when merely remembered removes the terrible anguish through kindness, which is encircled by hundreds of lightnings of everlasting glow, which rests (is seated) on the celestial tree, (growing) on the bank of the daughter of the mountain कलिन्द.

कलिन्दनगनन्दिनीतटवनान्तरं भासय-
न्सदा पथि गतागतश्रमभरं हरन्प्राणिनाम् ।
लतावलिशतावृतो मधुरया रुचा संभृतो
ममाशु हरतु श्रमानतितरां तमालद्रुमः ॥४॥

कलिन्दनगनन्दिनीतटवनान्तरं भासयन् सदा प्राणिनां पथि गतागतश्रमभरं हरन्, लतावलिशतावृतः, मधुरया रुचा संभृतः, तमालद्रुमः आशु मम श्रमान् अतितरां हरतु ।

May the तमाल tree (श्रीकृष्ण) remove completely and instantly my fatigue—the tree which brightens the interior of the wilderness (वृन्दावन) on the banks of the (Jumna) daughter of the कलिन्द mountain, the tree which always removes the burden of the fatigue of going and coming in the journey (of travellers) (journey of births and deaths), the tree encircled by hundreds of rows of creepers (गोपीs) and adorned by the pleasant splendour,

जगज्जालं ज्योत्स्नामयनवसुधाभिर्जटिलय-
ञ्जनानां सन्तापं त्रिविधमपि सद्यः प्रशमयन् ।
श्रितो वृन्दारण्यं नतनिखिलवृन्दारकवृतो
मम स्वान्तध्वान्तं तिरयतु नवीनो जलधरः ॥५॥

First two lines the same. वृन्दारण्यं श्रितः नत...वृतः नवीनः जलधरः मम स्वान्तध्वान्तं तिरयतु ।

May the new cloud (श्रीकृष्ण) destroy the darkness of my heart, the cloud which pervades the surface of the world with the new nectar full of splendour, the cloud which instantaneously removes even the threefold troubles of the people, the cloud which inhabited the वृन्दावन forest and which was surrounded by all the Gods bowing down (to him) !

ग्रीष्मचण्डकरमण्डलभीष्म-
ज्वालसंसरणतापितमूर्तेः ।
प्रावृषेण्य इव वारिधरो मे
वेदनां हरतु वृष्णिवरेण्यः ॥६॥

वृष्णिवरेण्यः प्रावृषेण्यः इव वारिधरः ग्रीष्म......मूर्तेः मे वेदनां हरतु ।

May (श्रीकृष्ण) the best of (वृष्णिs) like the cloud in the rainy season, remove the agony of mine, (I) whose body is distressed by the terrible flames of the disc of the scorching summer-sun in the form of the worldly existence !

अपारे संसारे विषमविषयारण्यसरणौ
मम भ्रामं भ्रामं विगलितविरामं जडमतेः ।
परिश्रान्तस्यायं तरणितनयातीरनिलयः
समन्तात्सन्तापं हरिनवतमालस्तिरयतु ॥७॥

अपारे......सरणौ विगलितविरामं भ्रामं भ्रामं जडमतेः परिश्रान्तस्य मम समन्तात्सन्तापं अयं......तिरयतु ।

May this श्रीकृष्ण, the new तमाल tree, whose home is on the bank of the daughter of the sun, remove the encircling vexations of mine who am dull-minded, exhausted, and restlessly wandering often and often in this impassable worldly existence, which is a road to the uneven forest in the form of worldly pleasures !

आलिङ्गितो जलधिकन्यकया सलीलं
लग्नः प्रियङ्गुलतयेव तरुस्तमालः ।

देहावसानसमये हृदये मदीये
देवश्चकास्तु भगवानरविन्दनाभः ॥८॥

प्रियंगुलतया लग्नः तरुः तमालः इव सलीलं जलधिकन्यकया आलिंगितः देवः भगवान् , अरविन्दनाभः देहावसानसमये मदीये हृदये चकास्तु ।

May the divine God विष्णु (with a lotus at his naval) sportively embraced by the (delicate) daughter of the ocean, like the तमाल tree by the प्रियंगु creeper, shine in my heart at the time of the termination of (my) body !

नयनानन्दसन्दोहतुन्दिलीकरणक्षमा ।
तिरयत्वाशु सन्तापं कापि कादम्बिनी मम ॥९॥

नयना......क्षमा कापि कादम्बिनी आशु मम सन्तापं तिरयतु ।

May that indescribable row of clouds (श्रीकृष्ण) which is able to enhance the mass of joy to the eyes, immediately remove my mental agony !

वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-
स्तां स्वप्नेऽपि न संस्पृशाम्यहमहंभावावृतो निस्त्रपः ।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तोऽपरः ॥१०॥

हे यदुपते, नाथ सुधामधुरया निर्मलया वाचा यां शिक्षां (त्वं) अदाः तां अहं अहंभावावृतः निस्त्रपः च स्वप्नेऽपि न संस्पृशामि, इति आगःशतशालिनं मां पुनरपि स्वीयेषु बिभ्रतः त्वत्तः (अन्यः) दयानिधिः नास्ति, मत्तः अपरः मत्तः नास्ति ।

O Lord, the best of यदुs I, shameless and overwhelmed by ego, do not remember even in dream the advice you gave me by speech which was pure and as sweet as ambrosia. Thus although I have committed hundreds of faults, you consider me among your beloved creatures, there is no ocean of mercy other than you and no arrogant person other than myself.

पातालं व्रज याहि वा सुरपुरीमारोह मेरोः शिरः
पारावारपरम्परां तर तथाप्याशा न शान्तास्तव ।

आधिव्याधिपराहतो यदि सदा क्षेमं निजं वाञ्छसि
श्रीकृष्णेति रसायनं रसय रे शून्यैः किमन्यैः श्रमैः ॥११॥

Last line शून्यैः अन्यैः श्रमैः किम् others as they are.

Go to Patala, or to the city of Gods or ascend the top of the Meru, cross the line of oceans, yet your desires will not cease. Overpowered by mental and physical pains, if you desire eternal bliss (क्षेम), taste the elixir "श्रीकृष्ण"; why resort to other efforts which are fruitless!

गणिकाजामिलमुख्यानवता भवता बताहमपि ।
सीदन् भवमरुगर्ते करुणामूर्ते न सर्वथोपेक्ष्यः ॥१२॥

गणिकाजामिलमुख्यानवता भवता, भवमरुगर्ते सीदन् अहमपि हे करुणामूर्ते बत न सर्वथा उपेक्ष्यः ।

O mercy incarnate, Alas! you should not altogether neglect me, who am desponding in the desert of worldly existence, **You**–who protected sinners of whom गणिका and अजामिल are the chief.

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ॥१३॥

मृद्वीका...खण्डितः (तथापि) हे मदीय जीव त्वया भूयो भवे भ्राम्यता भवता कृष्णेत्यक्षरयोः अयं मधुरिमोद्गारः क्वचिल्लक्षितः (किम), सत्यं ब्रूहि ।

O my Soul, you have tasted the grapes, enjoyed sugar to your heart's desire, drunk ample milk, when you went to heaven, (how) many times did you drink (suck) nectar and bite the lower lip of रम्भा, yet, tell me the truth, did you anywhere in your wanderings in the transmigratory existence witness that stream of sweetness (which oozes) from the two letters of which the word कृष्ण consists ?

वज्रं पापमहीभृतां भवगदोद्रेकस्य सिद्धौषधं
मिथ्याज्ञाननिशाविशालतमसस्तिग्मांशुबिम्बोदयः ।

क्रूरक्लेशमहीरुहामुरुतरज्वालाजटालः शिखी
द्वारं निर्वृतिसद्मनो विजयते कृष्णेति वर्णद्वयम् ॥१४॥

Victorious indeed is the pair of letters "कृष्ण" which is a thunderbolt to the mountains in the form of sins, which is the specific medicine to the prolonged illness in the form of the worldly existence, which is the rise of the disc of the sun to the vast darkness of night in the form of errorneous knowledge, which is fire encircled by gigantic flames to the trees in the form of ruthless afflictions, which is the entrance to the palace of final beatitude.

रे चेतः कथयामि ते हितमिदं वृन्दावने चारय-
न्वृन्दं कोऽपि गवां नवाम्बुदनिभो बन्धुर्न कार्यस्त्वया ।
सौन्दर्यामृतमुद्गिरद्भिरभितः संमोह्य मन्दस्मितै-
रेष त्वां तव वल्लभांश्च विषयानाशु क्षयं नेष्यति ॥१५॥

रे चेत: इदं हितं ते कथयामि, वृन्दावने गवां वृन्दं चारयन् कोऽपि नवाम्बुदनिभ: बन्धुः त्वया न कार्य: । (यतः). एष: अभित: सौन्दर्यामृतमुद्गिरद्भिः मन्दस्मितैः संमोह्य, त्वां तव वल्लभान् च विषयान् आशु क्षयं नेष्यति ॥

O mind, I tell you this for your benefit–you should not form friendship with a certain person (कृष्ण) resembling a new cloud (in complexion) and feeding a herd of cows in the वृन्दावन forest. (For) He will entice you by his charming smiles emitting all around the nectar of his beauty and will quickly lead you and your fond objects to extinction (i.e. will liberate you from this transmigratory existence.)

अव्याख्येयां वितरति परां प्रीतिमन्तर्निमग्ना
कण्ठे लग्ना हरति नितरां यान्तरध्वान्तजालम् ।
तां द्राक्षाद्यैरपि बहुमतां माधुरीमुद्गिरन्तीं
कृष्णेत्याख्यां कथय रसने यद्यसि त्वं रसज्ञा ॥१६॥

(हे) रसने यदि त्वं रसज्ञा असि (तर्हि) या ('कृष्ण' इति आख्या) अन्तर्निमग्नां अव्याख्येयां परां प्रीतिं वितरति, या कण्ठे लग्ना नितरां आन्तरध्वान्तजालं हरति, तां द्राक्षाद्यैरपि बहुमतां माधुरीं उद्गिरन्तीं "कृष्ण" इत्याख्यां कथय ।

O tongue, if your are an appreciator of sweetness, repeat that name "कृष्ण" giving out sweetness superior even to the grapes, which when it occupies the interior of the heart, gives inexplicable and great love (i. e. devotion) and which when repeated entirely removes the mass of internal darkness.

सन्त्येवास्मिञ्जगति बहवः पक्षिणो रम्यरूपा-
स्तेषां मध्ये मम तु महती वासना चातकेषु ।
यैरध्यक्षैरथ निजसखं नीरदं स्मारयद्भि-
श्चित्तारूढं भवति किमपि ब्रह्म कृष्णाभिधानम् ॥१७॥

अस्मिन् जगति बहवः रम्यरूपाः पक्षिणः सन्ति एव तेषां मध्ये चातकेषु मम तु महती वासना । यैः अध्यक्षैः अथ निजसखं नीरदं स्मारयद्भिः कृष्णाभिधानं किमपि ब्रह्म चित्तारूढं भवति ।

Many beautiful birds there are in this world; but among them all, I have a great fondness for चातक birds. (For) it is on account of them when they fall within the range of (my) sight and (consequently) remind (me) of their friend, cloud, that the indescribable ब्रह्म, named कृष्ण, rises (i. e. flashes) in my mind.

विष्वद्रीच्या भुवनमभितो भासते यस्य भासा
सर्वासामप्यहमिति विदां गूढमालम्बनं यः ।
तं पृच्छन्ति स्वहृदयमनावेदिनो विष्णुमन्या-
नन्यायोऽयं शिव शिव नृणां केन वा वर्णनीयः ॥१८॥

यस्य विष्वद्रीच्या भासा अखिलं भुवनं भासते, यः सर्वासां 'अहं' इति विदां गूढमालंबनम् । तं विष्णुं स्वहृदयं अनावेदिनः अन्यान् पृच्छन्ति । शिव शिव अयं नृणां अन्यायः केन वा वर्णनीयः ।

Alas ! who can describe the injustice of those men, who, not knowing their own hearts, inquire of others about विष्णु, by whose brilliance pervading the universe, the whole world shines and who is the incomprehensible basis of all knowledge of the consciousness of " अहं " (one's self).

सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिः सेव्यतां
चिन्तायामसि सस्पृहं यदि तदा चक्रायुधश्चिन्त्यताम् ।
आलापं यदि काङ्क्षसि स्मररिपोर्गाथा तदालाप्यतां
स्वापं वाञ्छसि चेन्निरर्गलसुखे चेतः सुखं सुप्यताम् ॥१९॥

हे सखे चेत: यदि त्वं सेवायां साभिलाषं असि (तर्हि) लक्ष्मीपति: सेव्यताम् । चिन्तायां यदि सस्पृहं असि तदा चक्रायुध: चिन्त्यताम् । आलापं यदि कांक्षसि, तदा स्मररिपो: गाथा (त्वया) आलप्यताम् । स्वापं वांछसि चेत्, निरर्गलसुखे सुप्यताम् ।

O friend mind, if you desire to serve, serve the consort of लक्ष्मी; if you desire to contemplate, contemplate over विष्णु, (whose weapon is the disc). If you want to converse, sing the verses of शिव; if you want to sleep, sleep in unlimited joy (i. e. the joy of Brahma (ब्रह्म)).

भवग्रीष्मप्रौढातपनिवहसन्तप्तवपुषो
बलादुन्मूल्य द्राङ्निगडमविवेकव्यतिकरम् ।
विशुद्धेऽस्मिन्नात्मामृतसरसि नैराश्यशिशिरे
विगाहन्ते दूरीकृतकलुषजालाः सुकृतिनः ॥२०॥

दूरीकृतकलुषजाला: सुकृतिन: भवग्रीष्म...वपुष: द्राग् निगडं अविवेकव्यतिकरं बलात् उन्मूल्य अस्मिन् विशुद्धे नैराश्यशिशिरे आत्मामृतसरसि विगाहन्ते ।

Blessed persons, removing the net of the sin, with their bodies scorched by the excessive heat of the summer in the form of this world breaking immediately the chain of contact with ignorance, bathe in this excessively pure pond of the bliss of Atma, cool on account of hopelessness.

बन्धोन्मुक्त्यै खलु मखमुखान्कुर्वते कर्मपाशा-
नन्तःशान्त्यै मुनिशतमतानल्पचिन्तां भजन्ते ।
तीर्थे मज्जन्त्यशुभजलधेः पारमारोढुकामाः
सर्वं प्रामादिकमिह भवभ्रान्तिभाजां नराणाम् ॥२१॥

बन्धोन्मुक्त्यै खलु मखमुखान् कर्मपाशान् कुर्वते, अन्त:शान्त्यै मुनिशतमतानल्पचिन्तां भजन्ते, अशुभजलधे: पारमारोढुकामा: तीर्थे मज्जन्ति । भवभ्रान्तिभाजां नराणां इह सर्वं प्रामादिकं (विद्यते) ।

Everything done by persons, who are perplexed in this world, is erroneous. They perform a number of कर्मन्S (rites) of which the sacrifices are chief, for getting freedom from bondage, contemplate much over the opinions of hundreds of मुनिS (Sages) and bathe in holy places with a desire of crossing the sea of sins.

प्रथमं चुम्बितचरणा जङ्घाजानूरुनाभिहृदयानि ।
आश्लिष्य भावना मे खेलतु विष्णोर्मुखाब्जशोभायाम् ॥२२॥

मे भावना प्रथमं चुम्बितचरणा (पश्चात्) जंघाजानूरुनाभिहृदयानि आश्लिष्य विष्णोर्मुखाब्जशोभायां खेलतु ।

May my imagination sport on the splendour of the lotus-like face of विष्णु, after first kissing (contemplating over) the feet and then embracing (contemplating) the legs, the knees, the thighs, the naval and the chest !

मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः
श्वपचात्मभुवोर्निरन्तरा मम भूयात्परमात्मनि स्थितिः ॥२३॥

मलयानिलकालकूटयोः (निरन्तरा) रमणीकुन्तलभोगिभोगयोः (निरन्तरा) श्वपचात्मभुवोः (निरन्तरा)(ईदृशी) परमात्मनि स्थितिः मे भूयात् ।

May I experience the residence in the great soul (unity with it), where one sees non-difference between the breeze coming from the मलय mountain and the deadly poison, between the hair of a beautiful woman and the body of a serpent and between Chandal and Cupid.

निखिलं जगदेव नश्वरं
पुनरस्मिन्नितरां कलेवरम् ।
अथ तस्य कृते कियानयं
क्रियते हन्त जनैः परिश्रमः ॥२४॥

निखिलं जगदेव नश्वरं, पुनः अस्मिन् (जगति) कलेवरं नितरां (नश्वरं), हन्त । अथ तस्य (कलेवरस्य) कृते कियानयं परिश्रमः जनैः क्रियते ।

The very whole universe is transitory and in it much more so is our body; alas ! What great troubles are undergone by men for its sake ?

प्रतिपलमखिलाँल्लोकान्मृत्युमुखं प्रविशतो निरीक्ष्यापि ।
हा हन्त किमिति चित्तं विरमति नाद्यापि विषयेभ्यः ॥२५॥

प्रतिपल...चित्तं किमिति अद्यापि विषयेभ्यः न विरमति ।

Even after marking every moment all people entering the jaws of Death yet alas ! why does not mind desist from the worldly objects ?

सपदि विलयमेतु राज्यलक्ष्मी--
रुपरि पतन्त्वथवा कृपाणधाराः ।
अपहरतुतरां शिरः कृतान्तो
मम तु मतिर्न मनागपैतु धर्मात् ॥२६॥

Let royal splendour vanish all at once, or let sword-edges fall over (my body). The God of Death may better take away my head but let not my mind (i. e. thought) budge an inch (lit. a little) from duty.

अपि वहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु ।
पातयतु वासिधारामहमणुमात्रं न किञ्चिदपभाषे ॥२७॥

मे रिपुः (मे) मूर्ध्नि निरन्तरं वहलदहनजालमपि धमतु, वा असिधारां पातयतु, अहमणुमात्रं न किञ्चिद् अपभाषे ।

Let my enemy incessantly blow excessive fire on my head or fall the edge of the sword (on it), I shall not talk even one offensive word.

तरणोपायमपश्यन्नपि मामक जीव ताम्यसि कुतस्त्वम् ।
चेतःसरणावस्यां किं नागन्ता कदापि नन्दसुतः ॥२८॥

हे मामक जीव तरणोपायं अपश्यन्नपि त्वं कुतः ताम्यसि, अस्यां चेतः-सरणौ नन्दसुतः कदापि न आगन्ता किम् ।

O my soul, though not conversant with any means to save (yourself) why do you pine ? Will the son of Nanda (Krishna) never (come into the way of your mind) be remembered by you ?

श्रियो मे मा सन्तु क्षणमपि च माद्यद्गजघटा-

मदभ्राम्यद्भृङ्गावलिमधुरझङ्कारसुभगाः ।

निमग्नानां यासु द्रविणमदिराघूर्णितदृशां

सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥२९॥

क्षणमपि च माद्यद्गजघटामदभ्राम्यद्भृङ्गावलिमधुरझंकारसुभगाः श्रियः मे मा सन्तु, यासु निमग्नानां द्रविणमदिराघूर्णितदृशां (नराणां) हरिचरणयोः सपर्यासौकर्यं अस्तम् अयते ।

May I not even for a moment possess the wealth which is attractive owing to the humming of the row of bees, hovering over the rut of the crowds of (rutting) elephants; because in the case of the people merged in लक्ष्मी the ease of worship of the feet of Hari disappears owing to their eyesight rolling (frenzied) through the wine in the form of wealth.

किं निःशङ्कं शेषे शेषे वयसः समागतो मृत्युः ।

अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी जननी ॥३०॥

वयसः शेषे किं निःशंकं शेषे (यतः) मृत्युः समागतः । अथवा, सुखं शयीथाः (यतः) निकटे जननी जाह्नवी जागर्ति ।

Why do you sleep fearlessly in the remaining part of (your) life as death has arrived ? Or sleep happily as the mother Ganges is awake near (you).

सन्तापयामि किमहं धावं धावं धरातले हृदयम् ।

अस्ति मम शिरसि सततं नन्दकुमारः प्रभुः परमः ॥३१॥

धरातले धावं धावं किमहं हृदयं सन्तापयामि । (यतः) मम शिरसि सततं परमः प्रभुः नन्दकुमारः अस्ति ।

Why do I torment my heart by running frequently (after every thing) on the surface of the earth ? The Supreme Lord, the son of नन्द, is there always over my head (i. e. to rescue me).

रे रे मनो मम मनोभवशासनस्य

पदाम्बुजद्वयमनारतमानमन्तम् ।

किं मां निपातयसि संसृतिगर्तमध्ये
नैतावता तव गमिष्यति पुत्रशोकः ॥३२॥

रे रे मम मनः मनोभवशासनस्य पादाम्बुजद्वयं अनारतं आनमन्तं मां संसृतिगर्तमध्ये किं निपातयसि । एतावता तव पुत्रशोकः न गमिष्यति ।

O my mind, why do you hurl me into the pit of the transmigratory existence-me who am incessantly bowing down at the lotus-like feet of the slayer of the mind-born (your son-Cupid)? By doing this much your grief for the loss of your son will not cease.

मरकतमणिमेदिनीधरो वा
तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूरा-
दृषिनिकरैरिति संशयः प्रपेदे ॥३३॥

तत्र दूराद् रघुपतिं अवलोक्य एषः मरकतमणिमेदिनीधरः वा तरुणतरः तमालः तरुः इति ऋषिनिकरैः संशयः प्रपेदे ॥

There (in the दण्डकारण्य) at the sight of the lord of रघुs from a distance, a doubt was entertained by the groups of sages as to whether it was a mountain of emeralds or a young तमाल tree.

तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुरा कुतः ।
इति रघुपतेः कायच्छाया विलोकनतत्परै-
रुदितकुतुकैः कैः कैरादौ न संदिदिहे जनैः ॥३४॥

एषा तरणितनया स्यात् किम् ? न, सा हि तोयमयी; वा मरकतमणि–ज्योत्स्ना स्यात् ? न, सा कुतः (ईदृशी) मधुरा ? इति विलोकनतत्परैः उदितकुतुकैः कैः कैः जनैः आदौ रघुपतेः कायच्छाया न सन्दिदिहे ? (सर्वैरेव सन्दिदिहे इति अर्थः ।)

Is this possibly the daughter of the Sun? No. :She, indeed, is full of water; or is this the lustre of emerald? No. How can it be so pleasant? What persons were there, who, being curiously absorbed in observation, did not mistake the complexion of the body of the lord of रघुs (for यमुना etc.) thus?

चपला जलदाच्च्युता लता वा
तरुमुख्यादिति संशये निमग्नः ।
गुरुनिःश्वसितैः कपिर्मनीषी
निरणैषीदथ तां वियोगिनीति ॥३५॥

जलदात् च्युता चपला (इयं) वा तरुमुख्यात् च्युता लता (इयं) इति संशये निमग्नः मनीषी कपिः अथ गुरुनिःश्वसितैः तां (सीतां) वियोगिनी इति निरणैषीत् ।

The wise monkey (हनुमान्) entertained doubts like "Is this the lightning dropped down from a cloud ? or a creeper dropped from a celestial tree ? Afterwards, he ascertained that she was a वियोगिनी lady (i. e. सीता) from her deep long sighs.

भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
नाशो हन्त सतामसत्पथजुषामायुः समानां शतम् ।
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि सन्.
किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः ॥३६॥

First two lines, the same. हे जगदीश, तव दुर्नीतिं वीक्ष्य कोपदहनज्वालाजटालोऽपि सन् अहं किं कुर्वे ? यद् अहं दीनः भवान् पुनः ईश्वरः ।

There is prosperity (reigning) in the houses of the wicked, (while) in the house of a Brahmin there is the uproar of poverty, also ! the good are ruined (while) followers of an evil path have a life of a hundred years (in store for them). O Lord of this world, although I am filled with the flames of the fire in the form of anger, at the sight of this injustice of yours, what shall I do, since I am a pauper, whereas you are the lord ?

आ मूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधे-
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥३७॥

रत्नसानोः मूलात् आ मलयवलयितात् पयोधेः च कूलात् आ यावन्तः काव्य-प्रणयनपटवः सन्ति ते त्रिशङ्कं वदन्तु। मृद्वीका...भाजां वाचां आचार्यतायाः पदं अनुभवितुं मदन्यः कः धन्यः अस्ति।

Let all those declare undoubtedly—those who are well-versed in composing poems, (those living) from the foot of the Meru mountain down to the shores of the Ocean, encircled by the Malaya Mountain, if there is any blessed person other than myself (blessed enough) to experience the position (or dignity) of being the master of words, possessed of the fortune of having the sweetness of the flow of the sweet juice, issuing out of the interior of grapes.

गिरां देवी वीणागुणरणनहीनादरकरा
यदीयानां वाचाममृतमयमाचामति रसम्।
वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
रधुन्वन्मूर्धानं नृपशुरथवायं पशुपतिः ॥३८॥

वीणागुणरणनहीनादरकरा गिरां देवी यदीयानां वाचां अमृतमयं रसं आचामति तस्य पण्डितपतेः श्रवणसुभगं वचः आकर्ण्य मूर्धानं अधुन्वन् अयं नृपशुः अथवा पशुपतिः (विद्यते)।

He must be either शिव or a beast in the form of a man who does not nod his head on hearing the poems (lit. speech) of the lord of poets (i. e. जगन्नाथपण्डित himself) charming to the ears—(the lord of poets) the sentiment of whose poetical composition, full of nectar, the goddess of speech sips, suffering her hand to disregard the playing upon the chords of her lute.

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित्केषांचिन्न खलु विदधीरन्नपि मुदम्।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः ॥३९॥

First two lines—the same. जगन्नाथभणितिः येषां आनन्दं न जनयति अहह! ते मन्दमतयः जीवन्तः अपि ध्रुवं मृतकाः (सन्ति)।

Honey, grapes, nectar itself and also the nectar on the lower lips of lovely ladies may not give delight even to some on some occasions (कदाचित्). But alas! those dull persons in whom the poems of Jagannath do not produce delight, are really dead, though (they are) living.

निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रवन्-
मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद् दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः ॥४०॥

If you are exceedingly capable of composing (words) poems which are successful in removing the pride of the sweetness of juice dropping from the grapes which are fully ripe, then, friend, you may, with pleasure, sing your poem before me; if not, do not show it outside your own heart, like a sinful act committed by you.

मद्वाणि मा कुरु विषादमनादरेण
मात्सर्यमग्नमनसां सहसा खलानाम् ।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसितमां कियतो विलासान् ॥४१॥

O my speech, do not be desponding because of the disrespect shown towards you by the wicked whose minds are full of jealousy because you will create immense pleasure on the faces of those, who are like bees to the honey in the lotus in the form of poetry.

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विपाको मम ॥४२॥

वसुधातले विद्वांसः परवचःश्लाघासु वाचंयमाः (सन्ति) भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः (सन्ति), अधुना कामालसस्वर्वामा...धरयन् मम वाचां विपाकः कस्य धन्यस्य आस्ये लास्यं धास्यति ।

On the surface of the Earth (in this world) the learned people are very sparing in praising the poems of others; the kings are staggering with the intoxication arising from the wine in the form of the pleasures of wealth. Now, on whose face, will the best poetry of mine, which surpasses the sweetness of the lowerlip of the impassioned heavenly damsels, dance? (i. e. those who will enjoy my poetry will be really blessed.)

धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम् ।
वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः ॥४३॥

द्राक्षाक्षीरेक्षु...सुधानाम् धुर्यैः माधुर्यैः अपि पण्डितराजस्य कवितायाः इयं माधुरी वन्द्या एव ।

The sweetness of the verses of the prince of poets (जगन्नाथ himself) is really praiseworthy even to the best sweetness of grapes, milk, sugarcane, honey and nectar.

शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि सम्भाविता
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
संप्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिकम् ॥४४॥

शास्त्राणि आकलितानि, सर्वेऽपि नित्यविधयः संभाविताः, दिल्लीवल्लभपाणिपल्लवतले नवीनं वयः नीतम् । मधुपुरीमध्ये हरिः उज्झितवासनं सेव्यते । (एवं) पण्डितराजराजितिलकेन सर्वं लोकाधिकं अकारि ।

The shastras were mastered; all the usual duties also were attended to; the prime of life was led under the blossomlike hands of the king of Delhi. Now, Vishnu is being worshipped (by me) in the city of Muttra in a manner in which all the desires are given up. (Thus) everything extraordinary has been done by (me), the foremost of the lines of the princes of poets.

दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया ।
मदीयपद्यरत्नानां मञ्जूषैषा कृता मया ॥४५॥

"जारजन्मानः दुर्वृत्ताः हरिष्यन्ति" इति शंकया मया एषा मदीयपद्यरत्नानां मंजूषा कृता ।

I have made this box (a safe, as it were) of the precious stones in the form of my verses, through the fear of their being plagiarised (i.e. stolen away) by the people of bad conduct and born of paramours.

Notes

1. माधुर्यस्य परमा सीमा-माधुर्यपरमसीमा the highest limit of sweetness. सारस्वतं एव जलधिः-कर्म तस्य मथनं-तस्मात् संभूता न अल्पं अनल्पम्-अनल्पं सुखं ददाति इति-ड त.। सुधा इव कविता-सुधा-कविता--कर्म. This way of opening a book will indeed seem unusual, but it is not strange in the case of जगन्नाथपंडित who indulged rather too much in self-praise as we shall see later on. It should also be noted in connection with this verse that it is not found in any other edition except that of Mr. Vaidya, which we are following and may probably be an interpolation.

2. करटिन्-formed by the affix इन् showing possession. करटः अस्ति अस्य. Here करट is used in the sense of a temple of an elephant. " काकेभगण्डौ करटौ " मदेन मलिनाःगण्डाः येषां तेः(बहु.). The elephant's rutting in the prime of youth is proverbial and has been referred to several times by the Sanskrit poets. दिशां अन्ताः-दिगन्ताः । करिणी-means a female elephant. They are by very nature objects of pity. कारुण्यस्य आस्पदं, by rule पात्र आस्पद स्थान etc. (vide Apte's guide sec 11-b) which requires these words to be used always in the neu. gender Sing. number. मृग्यन्ते (व्याधैः) इति मृगा. Beasts of prey. Ordinary beasts of prey are not worthy of even being attacked by the lion because they are insignificant. नखानां पाण्डित्यं the prowess of his nails which are extraordinarily sharp. नास्त्युपमा येषां ते अनुपमा -अनुपमाः शिखाः येषां-तेषाम्-of unparalleled sharpness.

The lion here complains that throughout the length and breadth of the world there is no animal that can match him in valour.

This type of verses is technically called an अन्योक्ति or अप्रस्तुतप्रशंसा. अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया (K. Pr. 10–15) i. e. description of what is not the matter in hand, leading to the implication of the matter in hand. For example in the present verse the poet expresses the invincibility of the lion, implying thereby his (the poet's) unique accomplishments in the sphere of poetry, polemics (science of discussion) and his versatility in all shastras. मंमट further sub-divides this अप्रस्तुतप्रशंसा in five sections, which does not form the province of the present course of studies. Some think-and that very correctly perhaps that herein जगन्नाथ pandit gives free vent to his egoistic nature, which is amply corroborated when we refer to many of his other verses (See introduction.) Leaving aside modesty, which a learned man must avoid, he waxes eloquent in praising his own unique accomplishments and vast erudition.

Idea:—The elephant is sorry because he has no match.

Application—Extra-ordinary persons feel uneasy when they do not find a competitor to fight with them.

3. मानस is the conventional abode of राजहंस (vide मेघदूत पूर्वमेघ latter half of v. 11 आकैलासाद् etc.) विकचानि च तानि सारसानि तेषामालयः ताभ्यः स्खलन्तः ये परागाः तैः सुरभीकृतं, adj. of पयः अभूततद्भावे च्विः (by Pan. 5-4-50), मिलतां अनेकेषां भेकानां कुलैः

आकुलम्–तस्मिन्–adj. of पल्वलजलम्. मरालानां कुलानां नायकः ‘ परागः कौसुमे रेणौ ”. “ पल्वलं चाल्पसरः ” Herein the contrast is very effectively brought out by placing the crystalline and highly scented waters enjoyed in the मानस, side by side with the filthy water of a puddle, repulsive owing to the shrill croaking of frogs.

Idea:—How is it possible for a person once rolling in luxuries to live in adversity ?

Appli:—This is applicable to a person who was once affluent (rich) but now indigent (poor).

Cf. सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति (M. K. 1–10).

4. तृष्णया लोले विलोचने यस्य सः adj. to चकोरीगणे। प्रस्थातुं कामः यस्य सः adj. to माने. For the compound see Apte's guide Sec. 181. धाराणां धराः तेषां आडम्बरः। ‘ आडम्बरः समारम्भे ’ इति विश्वः। Here are four locative absolute constructions. It is a convention of Sanskrit poets that the चकोरी birds long for drinking the rays of the moon. कैरव is a night-lotus which blooms at the appearance of the moon. The bud of a lotus resembles a closed mouth and hence the poet naturally likens this opening of the bud to that of the mouth.

The rise of the moon causes the disappearance of the anger of proud ladies, provoked by the jealousy in love as the moon infuses love in the heart of ladies so effectively that they are compelled to forget their anger.

Cf. for the conventions about चकोर and कैरव and the idea in the third line.

शृङ्गारदीक्षामणिः ... ...
... चकोरपरिषच्चिन्तामणिश्चन्द्रमाः ॥ प्रसन्न 7–60
स्वैरं कैरवकोरकान् विदलयन् यूनां मनः खेदय-
न्नम्भोजानि निमीलयन् मृगदृशां मानं समुन्मूलयन् ।
... ... इन्दुः समुज्जृम्भते ॥ प्रसन्न 7–59

धाराधराडंबरः विधातुमुचितः Here the infinitive is used in the passive sense. cf. उचितः प्रणयो वरं विहन्तुं M. 3–3.

Idea:—It does not become the creator to cover up the moon when so many are longing for its appearance.

Appli:—It is not proper for a prosperous man to nip in the bud, for nothing, the hopes of future prospects of the humble.

5. निरपेक्षः (विद्यते) v. l. स्पन्दमानं. meaning "throbbing" is not so appealing.

दलच्च तदरविन्दं च तस्य संबोधनम् । गन्धं वहति. the conveyer of fragrance i. e. wind. निर्गता अपेक्षा यस्मात् सः–निरपेक्षः मञ्जु is used here adverbially. अन्य the other or here it may mean extraordinary cf. अन्या जगद्धितमयी मनसः प्रवृत्तिः etc, तावकीन–is an adjective from युष्मद् formed according to तवकममकावेकवचने (Pan 4–3–3). "विमर्दोत्थे परिमलो गन्धो जनमनोहरे" मलते धारयति जनमनांसीति परिमलः परिमल is so called because it attracts the minds of the people. "अनुनयें तु अयि" The particle अयि is used for gentle address. Also see. Bh V–1–10.

Idea:—The wind, unlike the bee, is the disinterested friend of the lotus.

Appli:—It is necessary to learn to understand the real worth of persons who hover around us, humming our panegyrics, with a view to the achieve-

ment of their selfish ends, and those noble minded, selfless souls who utilize their life for the good of others. Here bees represent selfish persons and wind the selfless one.

6. कुटज is a kind of flower growing on the summits of mountains (Meghduta 1-4) मा गाः-मा अगाः मा or मा स्म in the prohibitive sense is used with the aorist in the imperative sense, the augment अ being dropped. cf. क्लैब्यं मास्म गमः पार्थ। (B. G. 2-3) मधु करोति तच्छीलः इति मधुकरः मकरन्देन तुंदिलाः (corpulent) " मास्म माऽलं च वारणे". The कुटज is an insignificant flower and it is consequently a great honour done to it if a bee, greatly respected by the lotuses, sanctifies it by its visit.

Idea :-- O Kutaja do not disrespect the bee.

Appli : –It is an excellent piece of advice to an ordinary man wherein he is asked not to lose the splendid opportunity of treating a dignified guest who was once extremely honoured by the great persons although he has come to him at that time as a mendicant.

7. वनस्य अन्तरम्-in the heart of the forest and not अन्यद् वनं as usual. मिलन्त्यः अलिमालाः यस्मिन् सः adj. to रसालाः "आम्रश्चूतो रसालः" Hence विरसान्-विगुणान्-Dull, without any interest. According to convention of poets, the कोकिल and the आम्रवृक्ष are closely connected for which cf. चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज। मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥ (K. S. 3–32) The cuckoo when alone is prohibited from cooing by the Sanskrit poets in general lest it be harassed by the crows through natural antipathy. When a mango tree blossoms

generally all cuckoos flock there and enjoy by cooing. At that time they unitedly will be able to withstand the attacks of the crows. For the antipathy of the cuckoos and crows cf. Bh. V 1-25. The crows are so dull that they cannot recognise the cuckoos unless they coo. If the second interpretation i.e. अन्यत् वनम् is followed the danger of the cuckoos being harassed by crows remains as it is. Here यावत् means "Until" cf. स्तन्यत्यागं यावत् पुत्रयोरवेक्षस्व । U. 7.

Idea:—O cuckoo, pass your days quietly until a mango blossoms.

Appli:—One should bear with the apathetic circumstances until fortune favours him.

कमलिनी-कमलानि सन्ति अस्याः—a lotus plant, मलिनीकरोषि soil, a verb formed by च्वि formation (न मलिनं अमलिनं, अमलिनं संपद्यमानं करोषि) "मकरन्दः पुष्परसः" न अभिजानन्ति इति अनभिज्ञाः- non-conversant, ignorant. परिणतः च असौ मकरन्दः च तस्य मार्मिकाः appreciators of developed honey. चिरं आयुः येषां ते- long lived.

Idea:—The कमलिनी should not repent because it is disrespected by herons.

Appli:—meritorious man, why are you sorry if you are disrespected by fools ? As long as the learned who appreciate your merit are alive, you have gained every thing.

9. The beauty of this verse depends upon the natural puns on the words नीच, रस, etc. and the cousequent implied senses to which it leads, अत्यन्तं, सरसं हृदयं यस्य सः-अत्यन्तसरसहृदयः । बहु० परेषां गुणग्रहीता—This is the example of a सापेक्षसमास, सापेक्षत्वेऽपि गमकत्वात्समासः ।

Although there is an अपेक्षा (need) of a compound the compound is not formed. Here गुण ought to have been connected with परेषां as परगुणग्रहीता, But even though it is not connected, this सापेक्षसमास indicates that while interpreting the words we cannot but understand it as one समास though according to actual words परेषां is away from गुणग्रहीता. गुणानां ग्रहीता-गुणग्रहीता ष. त. मा कृथाः for this construction see मा गाः (Bh. V. I-6).

